दक्षिणापथे अपरो ब्राह्मणकुमारो [111ᵃ] उज्जेनीयं ब्राह्मणमहाशालस्य पुत्रो श्यामो असितो वर्णेन पण्डितो निपुणो मेधावी । तेन गुरुकुलातो वेदा च मन्त्रा च शास्त्रा च अधीता ॥ सो दानि अधीतवेदाध्ययनो गृहातो निष्क्रम्य विन्ध्यपर्वतं गत्वा ऋषिप्रव्रज्यां प्रव्रजितो मूलफलपत्रभक्षो रुक्षवृत्तिः ॥ तेन तहिं विन्ध्यपर्वते आश्रमं मापयित्वा वाहितकेन मार्गेण युज्यन्तेन घटन्तेन व्यायामन्तेन चत्वारि ध्यानानि निष्पादितानि पंचाभिज्ञा च साक्षात्कृता ॥ सो चतुर्ध्यानलाभी पंचाभिज्ञो बद्धश्रुतो वेदपारगो असितो ऋषि समंतेन अभिज्ञातो परिज्ञातो । असितो ऋषि दिवि परिघुष्टो अन्तरीक्षचरो महर्द्धिको च महानुभावो पंचमाणवेहि शिष्यशतेहि सार्धं नालकेन च तहिं आश्रमे प्रतिवसति ॥ सो तं बोधिसत्वस्य जातमात्रस्य पृथिवीचालं च दृष्ट्वा महान्तं च ओभासं दृष्ट्वा मनोज्ञानि च अमानुष्याणि च गीतवाद्यशब्दानि श्रुत्वा दिव्यानि पुष्पवर्षाणि पतन्तानि दृष्ट्वा देवकोटीसहस्राणि च अप्सरसहस्राणि च दिव्यमाल्यगन्धहस्तानि खगपथेन पूर्वामुखमभिपतन्तानि अन्यानि च अद्भुतशतानि दृष्ट्वा उद्धर्षितरोमसंजातो ॥ किमिदं अद्य जंबुद्वीपस्य । इयं अद्य कस्यानुभावेन पृथिवी च

1. BC eṇi (B eçi) vṛihapa(C °hava)tishṭhato° C °to kroçaṁ nya ° daçaḥ mṛi° B °daça mṛi°. — 2. C °dujôli ca paripûrṇṇo ekâ urddhaṁ ca pañcamâḥ | B °jâli ca pratipanno ekâ ûrddhaṁgapaṁ°. — 3. BC çlakshṇâyi(C °ci)tâ ca(C °va) haṁsako naddha te(C °ddha) daçarama(C °radama)savarṇṇa°. — 4. C °rṇṇasiṁho caṁdramâ çu° B °çukrâ ca pañcamâ samâ°. — 5. BC °bhûtabra° C °hmâ va nî° BC °gopakshmato da° B °daçaḥ | .

6. BC ûrṇṇo u° B °ushṇishashṭiddau ca nâ° C °shayashṭidhâ(?) ca nâ° B °dvâtriçalakshaṇo da° C °çallakshaṇadhara da°. — 7. B °hmaṇo ku° C °tro syâmo a° BC °puno medhâvî te°. — 8. BC °kule(C °lî)to ve° B °çâstrato adhîto ‖ . — 9. C °dhyavanâ gṛi° B °gṛihato° B °rvate ga ° ksho uchavṛittiṁ | C °ksho uccavṛittiḥ | . — 10. C tena gatiṁ vi°

मूलं अक्षीनो पश्यति च कुमारं जाग्रितं ॥ राजा ऋषिस्य विस्मितो । महाभागो ऋषिः ॥ राज्ञा आज्ञप्तं । उपनामेथ कुमारं ऋषिस्य ॥ कुमारो सूक्ष्मायां अजिनप्रवेणियं गृह्य ऋषिस्य उपनामितो ॥ ऋषि कुमारस्य दूरतो एव कायेन महापुरुषलक्षणानि दृष्ट्वा अंजलिं मूर्धनि कृत्वा प्रत्युपस्थितो ॥ नमस्कृत्वा कुमारो ऋषिणा प्रतिगृहीतो ॥ ऋषिः कुमारस्य द्वाचिंशत्महापुरुषलक्षणानि प्रत्यवेक्षति ॥

ऋषिश्च तत्र राजकुले कुमारस्य चक्रवर्तिशब्दं शृणोति । नैमित्तिकेहि कुमारो व्याकृतः राजा चक्रवर्ती भविष्यति ॥ ऋषिस्य भवति ॥ नायं चक्रवर्ती भविष्यति । बुद्धो अयं लोके भविष्यति ॥ ऋषिस्तानि लक्षणानि दृष्ट्वा न एदृशानि राज्ञो चक्रवर्तिस्य लक्षणानि बुद्धानामेदृशानि लक्षणानि भवन्ति । बुद्धो अयं लोके भविष्यति । अहं च नचिरेण कालेन कालक्रियां करिष्यामि । इदं च रत्नं न द्रक्ष्यामि । इमस्य धर्मं न श्रोष्यामि गणोत्तमं च न द्रक्ष्यामि ॥ ऋषि प्ररोदी अश्रूणि च प्रवर्तयति ॥ राजा शुद्धोदनो असितं ऋषिं रुदन्तं दृष्ट्वा सान्तःपुरो उद्विग्नो जातो ॥ किं भगवन्तं कुमारं दृष्ट्वा रोदसि । मा कुमारस्य कांचिद्विपत्तिं पश्यसि ॥ कुमारस्य जातमात्रस्य पृथिवी कम्पिता षड्विकारं अवभासः लोके प्रादुर्भूतः देवसहस्रेहि पूजितो दिव्यानि कुसुमवर्षाणि दिव्यानि च तूर्यसहस्राणि संप्रवादितानि शब्दा निश्चरेन्सुः ॥ कुमारे जातमात्रे कपिलवस्तुस्मिं पंच कुमारशतानि जातानि पंच कन्याशतानि पंच दास[112a]शतानि पंच दासीशतानि संजातानि पंच हस्तिपोतशतानि पंच अश्वशतानि पंच निधानशतानि प्रादुर्भूतानि पंचहि राजशतेहि जयवृद्धीये प्रेषितायो अन्यानि पि च आश्चर्याद्भुतानि । भगवां च कुमारं दृष्ट्वा रोदिति । एवं मे भगवं आख्याहि मा कुमारस्य कांचिद्विपत्तिं पश्यसि ॥ ऋषिराह ॥ महाराज

1¹. C °smitaḥ ma° B °smito ma°. — 1². BC °shiḥ râ°. — 2¹. BC °ttaṁ upa°. — 2³. B C °sûkshmehi ajita(C °tra)praveçiyaṁ°. — 3. BC °to evaṁ kâ° B °mûrddhnane kṛi° C °mûrddhne kṛi° BC °sthito na°. — 4. BC °mâraṁ ṛi° B °hito ṛi°. — 5. C ṛishi kumâ° trimçanmahâ°.

6¹. B °varttiçabdaṁ°. — 6². B nemitti° C °vyâkṛito râjâç cakra° sbyati buddho a°. — 7¹. B °ti nâyaṁ°. — 8². C ṛishiḥ tâni° C °shṭvânaidṛiçâ° B °varttishya la° C °rttishya la° m edṛiçâni bhava°.

11¹. B imaṁsya dha° C imaṁ ca dharma na çro°. — 11². BC °açruṇi ca°. — 12. C °ntaḥpure u° B °jâto kiṁ°. — 13¹. C °gavan kumâ° B °dasi mâ° C °dasî ma°. — 13². B mâ | ku° C ma ku° BC °sya kâcid vi°. — 13³. C kumâro jâtasya tasya pṛithivî kaṁpitâ° obhâso loke prâdurbhâvaḥ deva° ditâni gitavâditaçabdâ° BC °çcaretsuḥ ku°.

16. C kumâro jâ° kumârasatâni° BC °ca kaṁnyâçatâni paṁca dâ° C °hastiçatâni pota° B °tehi jâyevṛiddhiye bodhaye preshitâ vo anyân api ca â° C °tehi jâtâye vṛiddhibodhaye preshitâto anyân api ca â° BC °dbhutâni bha°. — 19¹. C °gavâñ ca ku° BC °rodishi ‖ . — 19². B °gavâṁ â° C °gavân âkhyâ° BC °rasya kiṁci° çyati ‖ — 20². C °na kâṁcid vi°.

कुमारस्य न कांचिद्विपत्तिं पश्यामि । एदृशानां महाराज महापुरुषाणां कदाचित्कहिंचिल्लोके प्रादुर्भावो भवति । अयं महापुरुषो प्रादुर्भूतः बुद्धो लोके भविष्यति । अहं च वृद्धो न द्रक्ष्यामि । धर्मं च देशयिष्यति औपसमिकं चार्यं च निर्वाणिकं च तं च न श्रोष्यामि । गणवरं चास्य न द्रक्ष्यामि बुद्धविकुर्वितानि न द्रक्ष्यामि । तदेतां महाराज आत्मनो महाविपत्तिं दृष्ट्वा रोदामि ॥ ऋषिः बोधिसत्वं चतुर्हि कारणेहि एकांशेन व्याकरित्वा बुद्धो यं लोके भविष्यतीति प्रक्रान्तो ॥

नीवरणानि विजहित्व एकाग्रेण मनसा मम शृणोथ ।
यथा असितो परिदेवे उत्पन्ने शाकियकुमारे ॥
असितो नाम महर्षिः अभूषि यो वसति विंध्यविषयस्मिं ।
नियतनिचयो महात्मा महाकपिलउत्तमांगरुहः ॥
आरण्यशास्त्रकुशलो लाभी पंचान सो अभिज्ञान ।
कैलासशिखरवासी धनपतिरिव गुह्यकाधिपति ॥
सो वसति काननमूर्ध्नि मूलफलमकृष्टं रुच्कां वृत्तिं ।
शिष्येण नालकेन सार्धं अन्येहि च बहुहि ॥
दृशकुशलकर्मसेवी प्रशमदमरतो परे च ओवदति ।
देवगुणपारमिगतो ऋषिः परमशीलसंपन्नो ॥
अवभासो च सुविपुलो प्रीती लोकोत्तर असंमुह्यन्ती ।
सत्वा चैकान्तसुखी अभुन्सु पृथिवी च कम्पेसि ॥
सो तत्र संनिषण्णो पश्यति मन्दारवाणि कुसुमानि ।
धरणीतले पतितानि दिव्यानि च कल्पपुष्पाणि ॥

1. C °purushaṇâṁ°. — 2. C °durbhâvaḥ bu°. — 3¹. C °kshyâma dha° B °kshyâmi dha°. — 3². BC °shyati | au° B °câryâni nirvâ° C °câryyâ nirvâ° BC °shyâmi ga°. — 4. BC ganavaraṁ° BC °buddhanikûrvitâ°. — 5¹. C °tmano vipa°. — 5². BC °ṇehi | ekâṁ° B °bhavishyaṁtânti pra°.

7. B nivara° BC °hitvâ e°. — 8. C asito° tpanno çâkyaṁ kumâro asi° B °çâkyaku°. — 9. BC °nâma abhû° C °sati vindhyavi° yasmiṁ ni° C °shayesmiṁ ni°. — 10. C nicayatayo ma° B niyatacayo° pilavastu utta° C °ttamâṅgaruho â° B °ruhaḥ â°.

11. B °ṇyaçâstuku° BC °jñâna kai°. — 12. BC °lâçaçikharavâsi dhanapater iva°. — 13. B °kṛishṭa draṁcha vṛi° C °kṛishṭe uccavṛi°. — 14. BC so çishye° B °rddhaṁ aṁnyehi° BC °bahûni daça°. — 15. B °dame rato°.

16. BC °ṛishi para° C °çilosampanno o° B °nno obhâ°. — 17. C obhâse ca° B °so ca vipulo° BC °prîti lokottarâ a° C °asamuhya° BC °hyanto satvâ°. — 18. C °kânte sukhem abhutsuḥ pṛi° B °kânte sukha abhunsuḥ pṛi° C °vî ca kaṁpesu so ta°. — 19. BC °tatra nisharṇṇo pa° B °ravâni ku° BC °mâni dha°. — 20. BC °raṇitale° C °vyâni kalpa°.

IMPRIMERIE NATIONALE

पश्यति असितो च नभे आभरणशतानि विप्रकीर्णानि ।
सहस्रा प्रधावितानां गगनतले देवकन्यानां ॥
मधुरं च किंनरीणां शृणोति गीतस्वरं गिरिगुहासु ।
गिरिनदियो कूलवहां शमयति कुसुमाकुलजलौघां ॥
ओभासं पि च विपुलं समन्ततो पश्यति दशदिशासु ।
सहसा समुत्पतन्तं रवितरुणमरीचिसंकाशं ॥
एतानि च अन्यानि च बह्वनि आश्चर्यकानि दृष्ट्वान ।
उद्वर्षितरोमकूपो असितो चिन्तामनो आसि ॥
किन्तु खु मही प्रचलिता गगनतले दुन्दुभिनो च नदन्ति ।
ओभासितो च [112b] लोको प्रवर्षति च पुष्पवर्षाणि ॥
न विभान्ति चन्द्रसूर्या लवणजलो क्षुभ्यते असिततोयो ।
पद्मोत्तरीयपटला दृश्यन्ति कुसुमाकुलजलौघा ॥
सर्वे चिमे द्रुमवरा अकालकुसुमेहि .... च्छादिता ।
अद्य फलकुसुमभरिता सुरभी गन्धा प्रवायन्ति ॥
न च प्रज्वलते अग्निः निरयसहस्रेषु अद्य दिवसेन ।
न च वेदयन्ति दुःखं लोकान्तरिका विपद्यमाना ॥
न चापि क्षुधापिपासा यथा पुरे जायते शरीरस्मिं ।
हृदयं च मे प्रमुदितं किन्तु खलु भविष्यति अद्य ॥
अतिबलमुदीर्णहासा किं तु खलु पुरस्तिमे दिशाभागे ।
धावन्ति देवकन्या चन्दनचूर्णं गृहेत्वान ॥

1. BC paçyati ca asita nâmâ(C °ma â)bha° B °bharaṇâça° BC °tâni ca prakî°. — 2. C sahasâ pra° C °gaganatale B °gagane tale° BC °vakaṁnyânâṁ ma°. — 3. C °ca kinnari° BC °tasvarânitiguhâsu girina°. — 4. B °nadîyo kula° C °nadîkulava° BC °hâṁ gamyati | kusu ° lajâloghâṁ o°. — 5. BC °bhâsaṁ ca vi° C °pula sama° BC °çyati | da° B °çâsi saha°.

6. B °tpataṁti ravi°. — 7. BC °shṭvâ u°. — 8. BC urddhashitaro° C °to cittâmano°. — 9. BC kin (C kiṁ) tu khalu mahi° C °pracaritâ gaganatale dundubhi nandati o° B °ndubhi nandanti o°. — 10. C obhâsato ca loke ca varsha° B °ko ca varsha° BC °rshati pushpa°.

11. B navaṁ yatiṁ candrasûryo la° C naga patiṁ candrasûryyâ lava° BC °kshubhya asitatoyo ghotta° L °kshubhya asitota(*ou* te?) podyo°. — 12. BC ghottarî ° çyanti | ku° B °lajaloghâ sarve°. — 13. B °rve vise (?) dru° C sarve ca me drumavalâ akâraku°. — 14. BC °sumabhârabhari° C °rito surabhi gandhâ°. — 15. C °hasre dya diva° BC °vase na ca°.

16. C °duḥkhâṁ lo° BC °rikâ ca vinayamâna câpi kshu°. — 17. C °jâyate yerî° BC °rîresmiṁ hṛi°. — 18. BC °yaṁ ca se pra ° ntu khalu bhavi° C °ti | adya ati°. — 19. B atibale utîrṇṇa° C atibale udîrṇṇa ° diçobhâge | .

को नु खलु महानुभावो उत्पन्नो अद्य जंबुद्वीपस्मिं ।
कस्य यशेन यशवतो अयमेदृशको महाभावो ॥
तहिमेदृशं निमित्तं लोकस्मिं यस्य कस्यचिन्नोति ।
बुद्धानामुत्पादे एदृशका भोन्ति आकाराः ॥
पृथिवीय पतन्तानां शृणोति आकाशे अमरसंघानां ।
उत्पन्नो लोकनाथो बुद्धो होहिष्यति अनेयो ॥
सो दानि प्रमुदितमनो गगनतले शृणिय देवसंघानां ।
अद्य नरवीरगर्भो बुद्धो लोकस्मिं उत्पन्नो ॥
सो सर्वं जम्बुद्वीपं ओलोकयि दिव्यलोचनेहि ऋषि ।
अद्दस शाक्यान कुले जातो शुद्धोदनसुतो यं ॥
तस्यापि एवं दृष्ट्वा जातो दिशासु बोधिय कौलीनो ।
तत्रैष बुद्धशब्दो चरति द्रक्ष्यामि तं काले ॥
ते चापि कुठारिहस्ता कृष्णाजिनसुकृतउत्तरासंगा ।
वल्कलचीरांबरधरा आदाय फलोदकमागमि ॥
आकाशे निरालम्बे वायुपथे .... प्रक्रामि ऋषिः ।
ऋद्धिं संजनयित्वा क्षणेन आगमि कपिलवस्तुं ॥
हिमवतमूले अद्दर्शि नगरं रम्यं आदित्यबन्धुगुप्तं ।
दुर्धर्षं परशुभिः तं च सुरमणीयं चिदृशान इव ।
देवानां प्रविशे ऋषि पुरं शाकियदर्शनार्थाये ॥
सुसन्निभन्तं प्रविशे आपणपण्यक्रयप्रसक्तं पूर्णं ।

1. B kho nu kha° C °dvîpesmiṁ ka° B °smiṁ ka°. — 2. C °sya yaçe yaçava° BC °mahânubhâvo ‖ . — 3. B tahiṁ edṛi°. — 4. B °tpâdo edṛi° C °tpâdâ edṛiçaṁkâ bho°. — 5. BC atha vi(B °vithi)ya pata ° ghânâṁ u°.

6. C °tparo lo° BC °ddho bodhishyati | aneyo so dâ°. — 7. C gaganatale ° saṁghâṁnâṁ | . — 8. BC °garbho(C °rbbho) durgo bu° C °buddhe lokesmiṁ°. — 9. C °olokeyâ di° B °lokayâ di° BC °nehi ‖ ‖ ṛishi(C °shir) a°. — 10. BC adya sehi çâkyânâṁ kule° B °suto | yan tasyâ° C °suto | yaṁ ta°.

11. BC °jâto paṁcasu bo° B °dhiya kulino | C °dhiya kulâṁno | . — 12. C °kshyâmi naṁ kâ°. — 13. B °kṛishṇajina° C °kṛishṇâṁjina° BC °sukṛitaṁ u° C °saṁgo valka° B °saṁgâ valka°. — 14. C valkaravîrâmbaradha° B °lavîrâṁ° BC °lodakaṁ âgami | . — 15. BC °the prakrami ṛiddhiṁ saṁ°.

16. B °âgamo kapi°. — 17. C °mavantapâdamûle° B °vatapâdamûle addarçi° BC °ndhuguptaṁ gupta du(C °dû)rddha°. — 18. C dûrddharshapara° BC °daçânâ(C °na)m iva devâ°. — 19. B °viçe dṛiçi ṛishi puraṁ ṛishi sakadarça° C °viçe edṛiçi ṛishiḥ antaḥpuraṁ ṛishi sakadarça°. — 20. BC susaṁnibha° B °âpaṇyapaṇyakrayaprasaptaṁ hṛi° C °prasuptaṁ hṛi°.

हृष्टजनेहि प्रमुदितहयगजरथपत्तिसंघेहि ॥
सो मनसा उपगच्छन्तो द्वारे प्रविष्टो शुद्धान्ते .... ।
शुद्धोदनस्य निलयं निलयं यथा देवराजस्य ॥
प्रासादहर्म्मियं तं गवाक्षवरशरणपंजरविबुद्धं ।
गिरिकूटं इव गलितं पश्यति गगने विरोचेन्तं ॥
तस्मिं विमानमुख्ये कूटागाराणि रजतश्रीमाणि ।
शोभन्ति कर्णिकायो ऊताशनऊतार्चिसंकाशा ॥
गर्भगृहाणि शुभानि च सन्ति विशद्शंखहारकसंनिभा ।
विमलरविसंप्रकाशा द्योतन्ति कृता व च[113ᵃ]न्द्राणि ॥
दृश्यन्ति तत्र उप्पा वेरुलियस्य सुकृतेहि फलकेहि ।
गृहसूचीकावलीहि विद्युघनप्रसेकवर्णानि ॥
पश्यन्ति तोरणानि कनकमया अग्निज्वालसदृशानि ।
विमलरविसंप्रकाशा द्योतन्ति कृता व चन्द्राणि ॥
क्वचित्क्वचित्कालमेघसदृशसमदा पि सृजन्ति विय तोयं ।
क्वचित् निश्रितार्कसदृशा सतारका निश्चरन्ति क्वचित् ॥
मार्जारपोतका पि च क्वचित्क्वचित्सहसावपतन्ति तहिं ।
चस्यन्ति च वर्हिणेहि क्वचित्क्वचित्संपतन्तेहि ॥
मधुरं च पंजरगता क्वचित्क्वचित्कोकिला निकूजन्ति ।
शुकसारिका क्वचित्क्वचिदाभरणनिदानविभ्रान्ता ॥

1. C hṛishṭamña°. — 2. C sa mana° BC °pagato dvâre° C °ddhânto çuddho° B °ddhânte çu°. — 3. BC °jasya prâ°. — 4. BC °daharmiye gavâ° C °pañjalavibu°. — 5. BC °kûṭam iva ga° C °ti gagaṇa vilokayantaṁ ta° B °centaṁ ta°.

6. C °namukhe kûṭâgârâṇi rajant çrîmân çobha° B °rajanaçrîmâni ço°. — 7. BC °nti | karṇṇi° C °rṇṇikoyo hutâsanahutârvisaṁkâçâ | . — 8. B °bhâni tasaṁti vishaçaṁkhabhâ-rakaṁnibhâ nirmalara° C °bhâni taṁ santi vishasaṁkhabhâmakanibhâ nirmalara°. — 9. B C °kâçâ dyutiratha kṛitâ° C °vaccandrâni dṛi° B °va caṁdrâṇi dṛi°. — 10. B °çyanti | tatra candrabhiverulitayasya° C °çyanti | tatraivaṁ ubhâ velulitayasya° C °phaleshâṁ hi gṛi° B °phalakhîhi gṛi°.

11. B gṛihastûpikâva° C gṛihastûlikâva° BC °rṇṇâni pa°. — 12. C °mayâni a° B °gnijâla° C °jvâlâsa° B °çâni vi° C °çâni mala°. — 13. BC °laratisaṁpra° nti ca kṛitâ ca candrâṇi(C °ni) | . — 14. BC kva(B ka)cit kâlame ° çasamayâni sṛi ° yaṁ kva°. — 15. B °nisṛitâṁkasadṛi° C °nisṛitâbhasadṛi° B °ranti | mâ°.

16. B mâjânapâtakâ pi ca kacit saha° C °rjâlapo ° ca kvacit saha° BC °hasâ opatanti tahiṁ sa°. — 17. BC santehi ca° C °ca vahirgaṇehi° BC °ṇehi ca kva° B °padantehi ma°. — 18. C °raṁ paṁjalagatâḥ kvacit koki° B °tâ kvacit koki°. — 19. B °kasârakâṁ kvacit | âbha° C °kasâlikâṁ kvacit | âbha° BC °bhrântacittâ çu°.

शुद्धं दशसु विदिशासु चतुरस्रं निर्मितं सुआविद्धं ।
दुर्धर्षियं अरीभिः सूत्रग्रहस्य समुपचीर्णं ॥
बहुविधरत्नसंचयायं अनेकविचित्रसंघातभूमियां ।
सीहो निषद्यति विष्टं चसति च उद्देन्तमादित्यं ॥
तं युग्ययानकविगतं चेटीवेलासिकाहि च उपेतं ।
काषायकर्बुरवर्णं वर्षवरसमाकुलं प्रविशे ॥
प्रेष्यशतयानकलिलं आर्यजनसमाकुलं शुचिसुगन्धं ।
प्रविशे भवनदुवारं प्राप्तो जटिलो न्यसंरोधं ॥
ओसरणे च भरिता अद्दशि प्रमदा स्थितसंभ्रान्तेन ।
प्रगृहीतखड्गहस्ता अतिरिव प्रियदर्शनप्रलापा ॥
असितो चासौ व्यक्तो गम्भीरो सर्वशास्त्रसुविधिज्ञो ।
प्रतिहाररक्षमवोच निवेदये शाक्यराजस्य ॥
कालो स्मि विख्यातो भारद्वाजो हमस्मि गोत्रेण ।
जातो स्मि आर्य ति विषये सिखरे विन्ध्यस्मिं विहरामि ॥
साध्वार्य त्ति श्रुतधरो प्रतिश्रुणिय प्रापये महीपतिनो ।
तद्वचनं अनवशेषं श्रुत्वा च प्रवेशयित्वा च ॥
प्रतिभाणितो प्रविष्टो सिंहहनुस्य स्वर्गसदृशनिलयं ।
इन्द्र इव नन्दनं गतो संकीर्णं अप्सरगणेहि ॥

1. BC çuddha daça vidi° C °turasranirmi° BC °taṁ suaviddhaṁ du°. — 2. B durddhaparyaṁ aribhiḥ | sûtre grahasasyam upacirṇṇaṁ bahu° C °aribhiḥ sutragrahasaṁpannasya upatirṇṇaṁ bahu°. — 3. BC bahuviddha° C °cayayaṁ aneka° B °cayaṁ aneka ° saṁghatabhûmyâṁ si° C °saṁghaṭabhûmyâṁ siṁha nisha°. — 4. B siha nisha ° shṭaṁ grasati ca udetum âdityaṁ taṁ° C °shṭaṁ bhagrasati ca uddetum âditya taṁ yu°. — 5. B °kaviga(?)-ta cetive° C °gata cetivailâ° BC °sikâyehi ca°.

6. BC °yakaṁbudharaṁ varsha° B °rshavanasamâ° C °rshavaraṁ sa° BC °viçe pre°. — 7. B preshyaṇata° C °naka salilaṁ âryyaja° B °ryyajinasa° C °laṁ sucisugandha pra° B °ndhaṁ pra°. — 8. C °çe bhuvana° B °duvânaṁ prâ° C °tilo 'nya° B °nyasarodhaṁ osa°. — 9. BC osakaṇe ca bhaṇito a° L °bharitâ a° C °adarçi pra° B °pramado sthitâ saṁ° BC °sthitâḥ saṁbhrâjantena | . — 10. C °khadgahastâ° BC °darçanâpalâpini osi°.

11. BC ositâ ca vyaktâ gambhîrâ sa °jño prati°. — 12. BC °hârarakshe avo(C °vâ)ca ni° C °vedaṁye çâkyarâjakâ° B °jasya kâ°. — 13. B kâlesmiṁ vi° C kâlosmiṁ vi ° radvojo ha° BC °m asmiṁ gotreṇa jâ°. — 14. B °smi âḍhyâ ti vi° C °smi âdyâ ti vishaye çikha° B °khaye vindhya°. — 15. BC °dhvârya(C °ryya) nti çru ° tadharâ pra° C °payet mahi° BC °tino ta°.

16. BC °d vacanam ana° BC °yitvâ ca prati°. — 17. C °tibhaṇito° B °bhânito° C °shṭo sihahanu° BC °nusya sutasadṛiço virajaṁ indra°. — 18. BC indram iva nandanagataṁ | sani(C °taṁ saṁni)kirṇṇam apsara ° hi varddhâ°.

वर्धापये जयेन फलानि उपनामये असितनामो ।
प्रत्यग्रहेसि राजा स्वागतं भगवतो ति च अवोचत् ॥
अथ कनकमष्टपादं सुविचित्रकिलञ्जकं मणिविचित्रं ।
प्रज्ञप्तमासनवरं तत्र निषीदे अनुज्ञातो ॥
पर्यंकस्मिं निषण्णो पंचाभिज्ञो ऋषी महर्द्धीको ।
भक्तेन निमन्त्रेति स्वामं शुद्धोदनो राजा ॥
भक्तं कृतं प्रभूतं प्रतिश्रृणु तं अनामयन्तु ते भगवन् ।
इच्छाम ते कुमारं द्रष्टुं यदि ते अनुमतं स्यात ॥
स्वागतमनुरागतं ते सुप्तो तावत्प्रियदर्शि कुमारो ।
द्रक्ष्यसि त्वं प्रतिविबुद्धं विग्रहं इव जातरूपस्य ॥
प्रतिबुद्धं च कुमारं प्रवेणियं अष्टमंगलकृतायं ।
उपनामयि मातुस्वा घनविवरकृतं व आदित्यं ॥
दृष्ट्वान तं ऋषिवरो कुण्डलमिव पट्टकम्बलन्यस्तं ।
अभ्युत्थहित्व त्वरितं अंकेन प्रतीच्छति कुमारं ॥
अङ्केन गृह्य निशाम्य [113b] द्वात्रिंशल्लक्षणेषु उपागतं ।
तथा अनुव्यंजनेहि प्ररोदि आखण्डलसमानो ॥
तं अश्रुपूर्णनयनं राजा शुद्धोदनो इदमवोचत् ।
किं दानि ते कुमारं दृष्ट्वा दौर्मनस्यमुत्पन्नं ॥
यो तदहो जातमात्रो सप्त पदानुत्तरामुखो अगमि ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥

1. C °jayena saphalâ | upa° B °lâni | upa° C °sita ṛishi nâ° B °nâmo pra°. — 2. BC °hesi | râ° C °vatonti ca° B °cat | kiṁ dâni te kumâraṁ atha°. — 3. BC °shṭapâdâ suvicitravici(C °travicitra)kalantakâḥ maṇivicitro(C °tra) prajña°. — 4. BC °jñapta âsanava(B °nadha)râ tatra nishîde anujñâ pa°. — 5. C paryyaṅkesmiṁ° BC °nisharṇṇo paṁ° B °rishi ma° C °ṛishiḥ maha° BC °ṛddhiko bha°.

6. BC °treti | svâyaṁ çu° BC °râjâ bhotu°. — 7. BC bhotu kṛitaṁ° C °ṇu anâ° BC °yantu bhagavân ichâ°. — 8. C °anugataṁ°. — 9. B °nugataṁ te suko tâva° C °râgatan te su° BC °darçano ku° C °kumâraṁ dra° B °mâro u.jasi tvaṁ. — 10. BC °graham iva jâ ° sya pra°.

11. B °budhaṁ ca ku° BC °praveçiyaṁ°. — 12. C °mâtus tasmâd ghana° BC °taṁ ca âdityaṁ dṛi°. — 13. BC °shṭvâ ṛishivaraṁ kuṇḍa° C °patraṁ kambalaṁ nya° B °patrakaṁbala°. — 14. BC abhyusthahi° C °hitvaṁ tva ° prati kumâ°. — 15. B °gṛihya viçâ° C °triṁçalaksha° BC °upagataṁ | anuvyaṁ°.

16. BC anuvyaṁ° B °hi prârodi ashaṇḍarasamâno taṁ a° C °ṇḍarasamâ°. — 17. BC °nayano râ ° ddhadanam idam a°. — 18. C °daumana° BC °nasya utpa°. — 19. B so tadaho mâtamâtraṁ sapta° C °dahaṁ jotamâtre sapta padâ anutta° BC °ttaromu° B °kho gami taṁ°. — 20. BC tam(C tuṁ) bhuvaṁ brâ° C °hmaṇe dṛi° B °shṭvâ rodi°.

यस्मिं तदहो जाते छत्रं च वीजनीं च ग्रहेत्वान ।
अस्थान्सु अन्तरीक्षे दृष्ट्वा किं रोदिषि ब्रह्म ॥
यस्मिं तदहो जाते सर्वो ओभासितो अभूल्लोको ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते उदुपाना दुवे नभे उन्नक्छेन्सुः ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते देवा छत्रं नभस्मि धारेन्सुः ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते देवा मन्दारवाणि प्रकिरेन्सुः ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते अचेतना संप्रकम्पिता वसुधा ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते लवणजलो क्षोभितो असिततोयो ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते नभसि गता दुन्दुभियो वाद्यन्ति ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते पंच शता जाता शाक्यपुत्राणां ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते पंच शता जाता शाक्यकन्यानां ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तदहो जाते पंच शता जाता मह्य दासानां ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥

1. B °vijani gra° C °vijani grahe° BC °tvâna a°. — 2. C asthâtsuḥ anta° B asthânsuḥ anta° BC °kshe taṁ dṛi ° shi brâhme | . — 3. C °sarve obhâ° B °bhâsato abhû loko taṁ° C °lloke tan°. — 4. B taṁ | tu° C tan tu ° brâhmaṇaṁ dṛi°. — 5. BC °pânâ udvahetsuḥ taṁ (C °tsu tan)°.

6. BC taṁ (C tan) tuvaṁ dṛi°. — 7. C yasmiṁ jâta de° BC °traṁ nabhe dhârayetsuḥ taṁ tu°. — 8. C °hmaṇaṁ dṛi°. — 9. C °kiretsuḥ taṁ tu° B °kiretsuḥ tuvaṁ°. — 10. B tuvaṁ° C °hmaṇaṁ dṛi°.

11. C °aceshṭanâ° BC °nâ kaṁpi ° dhâ taṁ tu°. — 12. C °hmaṇaṁ dṛi°. — 13. B °to açitatoyo taṁ tu° C °sitatopâ taṁ°. — 14. C taṁ tuvo brâhmaṇaṁ dṛi°. — 15. C °nagasi° BC °gatâṁ du ° nti taṁ tu°.

16. C taṁ tuvo brâhmaṇaṁ dṛi°. — 17. BC °trâṇâṁ taṁ tu°. — 18. C °hmaṇo dṛi°. — 19. BC °çâkyakaṁnyânâṁ taṁ tu° — 20. C °hmaṇaṁ dṛi°.

21. BC yasmin tada° C °çatânâṁ mahyaṁ dâ° B °sânâṁ taṁ tu°. — 22. C tan tuva brâhmaṇaṁ dṛi°.

यस्मिं तद्दहो जाते पंच शता जाता मह्य दासीनां ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तद्दहो जाते मह्य तुरगाणां पंच शता जाता ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तद्दहो जाते पंच शता गजपोतानां जाता ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तद्दहो जाते पंच निधिशता मुखानि दर्शेन्ति ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्मिं तद्दहो जाते मण्डलिनो राजानो प्रणत मह्यं ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यस्य राजाचार्या ब्राह्मण संदर्शनाय उपयान्ति ।
तं तुवं ब्राह्मण दृष्ट्वा किं रोदिषि श्रोतुमिच्छामि ॥
यं पश्यित्वा मनुजा भवन्ति हृष्टा सुखी उदग्रा च ।
तं तुवं ब्राह्मण दृष्ट्वा किं रो[114ᵃ]दिषि श्रोतुमिच्छामि ॥
व्यपनय ब्राह्मण शोकं भव मुदितमनो सुखं प्रतिलभाहि ।
एषो भविष्यति नृपो सप्तरतनवा पृथिविपालो ॥
एवं उक्ते अवची असितो सितसाङ्क्यं इदमवोचत् ।
अश्रूणि प्रमार्जन्तो ..... व्याकृतो ऋषिभिः ॥
आनन्दङ्कतासनबङ्कतरुणार्कनिभो न सो पुरुषसिंहो ।
होहिति नरपति राजा होहिति शास्ता अनभिभूतो ॥
एषो हि चीहि क्रमेहि त्रैधातुकं लंघिया अनवशेषं ।

1. BC yasmin tada° C °çatâ mahya dâ°. — 2. C °hmaṇaṁ dṛi°. — 3. C °jâte pañca çatâ jâta mahyaṁ turagânâṁ taṁ tu° B °çatâ jâtâ taṁ tu°. — 4. C °vaṁ dṛishṭvâ brâhmaṇaṁ kiṁ ro°. — 5. B yasmin tada° BC °potâ jâtâ | .

6. BC °hmaṇaṁ dṛi°. — 7. C °jâtaṁ pañca° BC °çatâni mu° C °darçayanti taṁ tu°. — 8. C °vaṁ dṛishṭvâ brâhmaṇaṁ kiṁ ro°. — 9. C yasmiṁ jâte tadaho maṇḍa ° ṇatâ mahyaṁ | , — 10. BC °hmaṇaṁ dṛi° B °m ichati ‖ .

11. B °râjacaryâ brâ° BC °ṇa darça° C °upajâyanti taṁ tu° B °upajânti | . — 12. B °hmaṇo dṛi° C °hmaṇaṁ dṛi°. — 13. B °paçyiyâ ma° C °paçyitva ma° BC °bhavaṁ hṛishṭa sukhâ uda°. — 14. BC °hmaṇaṁ dṛi°. — 15. C vyupana ° hmaṇaṁ ço ° labhâmi bhavi° B °bhâhi bhavi°.

16. BC °shyati | nṛi° B °nṛipaṁ saptaratnaṁ pṛi° C °nṛipâ saptaratnavâ pṛi° BC °thivipâlo ‖ . — 17. B evam ukte° C evaṁmukte° BC °avaci asi° C °asito sito sitasâ°. — 18. BC açruṇi ° nto vyâ° B °bhiḥ nanda°. — 19. BC °ṇârkkanibhâ na so ° siṁho ho°. — 20. C hohîti na° B °pati na râjâ hohati çâ° C °jâ dehîti çâ°.

21. BC °ghiya anavaçeshaṁ çi°.

शिवममरं निरन्तरायं अधिगमिष्यति उत्तमं धर्मं ॥
जीर्णो अहं गतवयो दहरो च नरोत्तमो अचिरजातो ।
कालगतो भविष्यं अहं यद् बोधिं प्राप्स्यति कुमारो ॥
बुद्धो अयं भविष्यति सर्वज्ञो सर्वधर्मवशवर्ती ।
स्वाख्यातधर्मविनये अहं च जीर्णो ति रोदामि ॥
नापि मह्यं मरणभयं कहिं तु जातो न म्रीयते मनुजो ।
बुद्धं तु अप्रतिसमं न द्रक्ष्यन्तेन रोदामि ॥
न खु मह्यं मरणभयं कहिं तु जातो न म्रीयते मनुजः ।
धर्मं तु ओपसमिकं न श्रोष्यं तेन रोदामि ॥
न खु मह्यं मरणभयं कहिं तु जातो न म्रीयते मर्त्यो ।
संघं गुणसागरमहं न द्रक्ष्यन्तेन रोदामि ॥
यो बुद्धो बोधयिष्यति प्रजामिमां भोगेहि चिरप्रसुप्तां ।
सो यं प्रादुर्भूतो अहन्तु जीर्णो ति रोदामि ॥
यो मुक्तो मोचयिष्यति प्रजामिमां रागबन्धनैर्बद्धां ।
सो यं प्रादुर्भूतो अहं तु जीर्णो ति रोदामि ॥
यो मुक्तो मोचयिष्यति प्रजामिमां मोहबन्धनैर्बद्धां ।
सो यं प्रादुर्भूतो अहन्तु जीर्णो ति रोदामि ॥
यो मुक्तो मोचयिष्यति प्रजामिमां रागदोषमोहेषु ।
सो यं प्रादुर्भूतो अहन्तु जीर्णो ति रोदामि ॥
यो आत्मना अरोगो भूत्वा अन्यां अपि काहिति अरोगां ।
सो यं प्रादुर्भूतो अहन्तु जीर्णो ति रोदामि ॥

1. C °vam amararûpatarâyaḥ madhigamasîtim utta° B °nirupatarâ ° gamasitim utta°. — 2. BC °jâto kâla°. — 3. BC °gato haneshyaṁ ‖ atha bo° C °prâpya ku° BC °mâro ayaṁ buddho bha°. — 4. BC °shyati | sa° C °çavattî svâ° B °rttî svâ°. — 5. C °khyâta dhavina° BC °naye | ahaṁ°.

6. C °raṇaṁ bha° BC °bhayaṁ | kahin tu jâto na mriyate ° jo bu°. — 7. C buddhan tu a°. — 8. BC taṁ khu ma ° kahin tu jâto na mriyate° C °manujo dha° B °jaḥ dha°. — 9. C dharma aupasami° B °rmaṁ opa° C °çroshyan tena ro°. — 10. BC °khu mahya ma ° kahin tu jâto na mriyate° B °marttyâ | C °marttyena saṁ°.

11. BC saṁghan tu sâga°. — 12. BC °mâṁ bhagavati cira° B °suptâ so yaṁ° C °suptoḥ so yaṁ°. — 13. B °rbhûtâ | aha°. — 14. C °yishya prajâ ° ndhanai baddhâṁ | . — 15. B °rbhûtaḥ ahaṁ jîrṇṇo° C °ahan tu jîrṇṇo°.

16. C °yishyaṁ prajâ° BC °mohaprabandha° C °ndhanaiḥ baddhâṁ | . — 17. C °ahaṁ tu jî°. — 18. B °yishyâmi prajâ° C °yishyaṁ prajâ ° râgadveshamo°. — 19. C °ahaṁ tu jî°. — 20. BC âtmanâ° B °anyampi kâ° C °anye pi kâ ° rogaṁ prâdu° B °rogaṁ | .

21. B °rbhûta aha° C °rbhûtaḥ ahaṁ jî°.

यो आत्मना अशोको भूत्वा अन्यां अपि काहिति अशोकां ।
सो यं प्रादुर्भूतो अहन्तु जीर्णो ति रोदामि ॥
यो आत्मना विशल्यो भूत्वा अन्यां अपि काहिति विशल्यां ।
सो यं प्रादुर्भूतो अहन्तु जीर्णो ति रोदामि ॥
सुखिता इमे नरमरू काशिपुरे धर्मराजं द्रक्ष्यन्ति ।
चक्रं प्रवर्तयन्तं अहन्तु जीर्णो ति रोदामि ॥
सुखिता इमे नरमरू द्रक्ष्यन्ते गणवरस्य मध्यगतं ।
अमृतं प्रतिभजमानं अहन्तु जीर्णो ति रोदामि ॥
व्याधि जरा च मरणं अंतरायकरा बहू मनुष्याणां ।
आश्वासा उत्पन्नो अहं अनाश्वसो रोदामि ॥
तथा ऋषि आलपित्वा बहूनि करुणायन्तो वेपित्वा ।
अनुशंसे वाचाये नरव[114b]रदमकं तदा दृष्ट्वा ॥
प्राचीनदिशं अवोच इहागतो नरुत्तमं गवेषन्तो ।
न हि सुलभो उत्पादो बुद्धान अदान्तदमकानां ॥
सो दानि बोधिसत्वं बङ्कशो अभिप्रदक्षिणं चरित्वान ।
आमन्त्रये नरपतिं गच्छामि स्निग्धवतीं भवान्देतु ॥
बुद्धनिर्घोषं श्रुत्वा गच्छेसि विनायकोत्तमसकाशं ।
चरयेसि ब्रह्मचर्यं वचनपरिकरो च तस्य स्यात् ॥
साधु इति प्रतिश्रुत्वा असितस्य नारदो इदं वचनं ।

1. B °açoka bhûtvâ | amnyâhi pitikâhi açokâ so yam° C °tvâ anyâpi kâmhiti açoko so yam°. — 2. BC °rbhûto | a° C °ahaṁ tu ji°. — 3. B °çalyâṁ bhû° BC °anyâ pi kâṁhi(C °hi)ti viçalyâṁ so°. — 4. B so haṁ prâdurbhûtaḥ a° C °ahaṁ tu ji°. — 5. BC °imaṁ naramaruṁ kâ° B °dharmaṁ râjaṁ° BC °nti cakraṁ°.

6. BC °ntaṁ | aha° C °jirṇṇo rodâ°. — 7. BC °maru drakshya ° gataṁ a°. — 8. C °mṛitaṁ pritabha° BC °mânaṁ | a° C °ahaṁ tu ji°. — 9. BC °yakaraṁ bahû amanu° B °nushyâm edṛi° C °nushyâ edṛi°. — 10. BC edṛiça(B °çaṁ)kaṁ âçvasto(B °çvanto) utpanno ahaṁ a ° sto ti rodâmi | .

11. BC ṛishi(C °shiḥ) alipitvâ bahuni karuṇâni(B °ṇâti) santi ve° C °vepayitvâ° BC °tvâ a°. — 12. BC anuçâsa vâcâya na° C °damaṁkaṁ ta ° shṭvâ pritina° B °shṭvâ prâ°. — 13. BC °naram evaca ihâ(B °ha)gato naru(C naram u)ttamaṁ ° shanto na hi°. — 14. C °surabho u ° ddhânâṁm adâ° B °ddhânâm adâ° BC °dântamadakânâṁ | ; — 15. *Cette strophe et la suivante se suivent en ordre inverse dans les mss.* — BC °tvâna â°.

16. BC °ntraya nara° B °châmi | snigdhavatîm bhavân detu sâ° C °châmi niçya(*ou* gdha)vatî bhavâna detu sâ° A °gdhapatiṁ bha°. — 17. BC gaccheçi vinâ ° ttamaṁ sakâçaṁ varayesi.°. — 18. C °tasyâsyât | . — 19. B sâdhviti pra° C sâdhviti pra° BC °canaṁ pra°.

प्रव्रजिय गणज्येष्ठो अभूषि अरहा विधुतक्लेशो ॥
कात्यायनस्य सगोत्रं नामेन नारदं जिनस्य सुतं ।
वनेवासिनं .... वन्दथ परिनिर्वृतं स्थविरं ॥
तं निर्वृतं समशान्तं निरुपधिं सर्वोपधिक्षयविमुक्तं ।
सर्वप्रपञ्चातीतं वन्दथ परिनिर्वृतं स्थविरं ॥

चतुर्हि कारणेहि असितेन बोधिसत्वो एकांशेन व्याकृतो बुद्धो भविष्यतीति ॥ कतमेहि चतुर्हि ॥ लक्षणानां व्यक्तायै सुविभक्ततायै गम्भीरतायै अखण्डश्रेष्ठतायै ॥ बुद्धानां भगवतामशीत्यनुव्यंजनानि आसि ॥ बुद्धानां भगवतां तुङ्गनखा ताम्रनखा स्निग्धनखा वृत्तांगुली च चिचांगुली च अनुपूर्वचिचांगुली च । निर्ग्रन्थिशिरा च गूढशिरा च गूढगुल्फा घनसन्धी च अविषमसमपादा च । बुद्धा भगवन्तो प्रतिपूर्णव्यंजना च समन्तप्रभा च मृदुगात्रा च विसदगात्रा च अदीनगात्रा च । अनुसन्धिगात्रा च । सुसंहतगात्रा च । सुविभक्तांगप्रत्यंगा च । निखिलादुष्टशरीरा च । व्यपगततिलकालकगात्रा च पुनर्बुद्धा भगवन्तो तूलमृदुपाणयश्च । गम्भीरपाणिलेखा अभग्नपाणिलेखा च अच्छिन्नपाणिलेखा च । अनुपूर्वपाणिलेखा च । बिम्बोष्ठा च । नाभ्यायतनवचना च । मृदुतनुकरक्तजिह्वा च । गजगर्जितस्तनितस्वरा च । सुस्वरवरगिरा मञ्जुघोषा च बुद्धा भगवन्तो । नागविक्रान्तगामी च । ऋषभविक्रान्तगामी च । सिंहविक्रान्तगामी च । अ-

1. C °vrajigaṇajyeshṭo a° B °bhûshi | a° C °araho vi° B °vidhûta° BC °kleço kâ°. — 2. BC kâtyâyanagotro nâmnâ nâla(C °ra)daṁ ji°. — 3. BC vanenaivasi vanda(C °naivâsi candrâ)tha° C °rinivṛitaṁ°. — 4. BC °ntaṁ niropadhiṁ upadhi° L °dhiṁ samopa°. — 5. C sarvaṁ prapaṁcâtitaṁ° BC °ndatha | pa°.

6. B °ekâçena°. — 7^2. B °ratâyaiḥ a ° shṭatâyair buddhâ°. — 8^1. C °vatân açitya° BC °tyavyaṁja° C °ni âsid buddhâ° B °si buddhâ°. — 8^2. BC °bhagavatâṁ(C °tâ) nuganâ(C °gatâ) vâcatâ asukhâ asnigdha° B °nakho varttaṁ vâguli ca ci° C °nakho ca vṛittaṁ vâṁgulîṁ ca vinigranthaçilâ ca°. — 9. BC vinigranthaçirâ câ(C °çilâ ca) gûḍhasirâ(C °çilâ) ca gûḍhâṁ oledhû(C °ladhu)nakasatvânâṁ ca avi(B °abhi)prasasama(B °saya)pâ° C °pâdâ ca bhaga°. — 10. BC °pratirûpaṁ vyaṁja(C vyaṁja)nâ° B °ntavaharo ca mṛi° C °ntabahavo ca mṛi°.

12^1. BC anusantagâtrâ ca | . — 12^2. BC susaṁghata(C °ta)gâ°. — 12^3. B °bhakshâṁgapra° C °bhakshâpratyaṅga gâtrâ ca | ni°. — 12^4. BC nikîlâ a° C °shṭagâtrâ ca vya°. — 13. BC °trâ ca | punar buddho bha° C °pânayaça | . — 14^1. B °gnapaṇileshâ ca achinnapâṇileshâ ca | C °nnapâṇilekhâ anupû°. — 15^1. C bimbo ca nâbhyâ°. — 15^3. BC °dutanaka(C °taruka)bahujihvâ ca | .

16^1. C °nitasusvarâ ca su°. — 16^2. C °girimaṁjughoshâça buddho bha° B °girimaṁjughoshâ ca ‖ bu ° nto nâ°. — 17^1. C °krânto gâ°. — 17^2. C °krânto gâ°. — 17^3. C °krânto gâ°. — 17^4. C °abhiprada°.

भिद्चिणगामी च । उत्सदसमा च समन्तप्रासादिका च । शुचिसमाचारा च । परमशुचिविशुद्धलोमा च । वितिमिरसमन्तप्रभा च । बुद्धा भगवन्तो ऋजुगात्रा च । मृदुगात्रा च अनुपूर्वगात्रा च । चापोदरा चारूत्वाभमोदरा च । गम्भीरनाभी च । अभग्ननाभी च । अच्छिन्ननाभी च । अभिद्चिणावर्तनाभी च । परिणतजानुमण्डला च । बुद्धा भगवन्तो वट्टितदाठा च । तीक्ष्णदाठा च । अ[115a]भग्नदाठा च । अच्छिन्नदाठा च । अविषमदाठा च । तुंगनासा च । नात्यायतनासा च । असितनयना च । असितसितकमलसदृशनयना च । बुद्धा भगवन्तो असितभ्रमू च स्निग्धलोमभ्रमू च । अपरीत्तकर्णा च । अविषमकर्णा च । व्यपगतकर्णदोषा च । अनुपहता अनुपक्लिष्टा शान्तेन्द्रिया च उत्तमश्रेष्ठसंमितमुखललाटा च बुद्धा भगवन्तो ॥ असितकेशा च । सहितकेशा च । चित्रकेशा च । विवृत्तकेशा च अभग्नकेशा च । अच्छिन्नकेशा च अपरुषकेशा च । स्निग्धकेशा च सुरभिकेशा च । वल्लिताग्रकेशा सुशिरसो स्वस्तिकनन्द्यावर्तमुक्तिकश्रेष्ठसंनिकासा च बुद्धानां भगवन्तानां केशा ॥

एतानि बुद्धस्य अमेयबुद्धिनो
काये अशीतिं अनुव्यंजनानि ।
येहि स्म कायो सततं अलंकृतो
देवातिदेवस्य नरोत्तमस्य ॥
प्रशस्तानि यस्य द्वे चिंशतिं च
अशीतिं च काये अनुव्यंजनानि ।
समन्ता च व्यामप्रभा निश्चरेन्सुः

2¹. C °ddharomâ ca vi°. — 2³. C buddho ṛiju°. — 3². BC châdo(C chàto)radà câru-kshâ abhagnodaro ca | . — 3³. C gaṁbhica abhida°. — 5². C °nto varttitadâtâ ca ti° B °dâṭâ ca | . — 5³. B atikshṇadâtâ ca | C °kshṇadâṁtâ ca abha°.

6¹. C abhayadantâ ca B °dâṭâ ca | . — 6². C °nnadantâ ca B °dâtâ ca | . — 6³. C °madantâ ca B °dâṭâ ca | . — 6⁴. C °nâçâ ca. — 6⁵. BC nâyatyâyata° C °nâçâ ca. — 7². BC arcitacitakama°. — 7³. C buddho bha ° sitatomû ca sahitabhrumû ca anilomabhruvaçca snigdhalomabhruva | aparî° B °mabhramû ca a°. — 8¹. BC °paritakarṇṇà ca | . — 8². B avishakarṇṇâ ca | . — 9². C °hatâ anupakṛishṭâ° BC °çreshṭam ami(C °mṛi)tamu°. — 10². BC ahasitake°. — 10³. BC cita(C vivitra)keçâ°.

11¹. BC vitarka(C °rkka)keçâ ca abha°. — 12². BC vellitâ ° çâ saçira ° kanandâvarttânuttariya çreshṭhasaṁni(C °shṭasanni)bhâsâ ca | bu°. — 14. B °sya aneyabu° C °sya anekabuddhi ° kâye kâye çîti vyaṁja° B °kâye çitim anu°.

16. BC °ttamasya pra°. — 18. BC °triṁçati ca a ° nâni sama°. — 20. BC °çcaretsuḥ | ka° C °thaṁ noma vi° BC °vijñâ ji° C °prapride ça° B °side çata°.

कथं नाम विज्ञू जिने न प्रसीदे ॥

शतखुत्तो समादाय यं पुण्यं सर्वसत्त्वनां ।
तेनास्य लक्षणवरं काये एकं निवर्तये ॥

राजा शुद्धोदनो सान्तःपुरो सार्धं कुमारेण उद्यानभूमिं निर्धावितो ॥ बोधिसत्वो उद्यानभूमीये अनुचंक्रमन्तो कृषिग्राममनुप्राप्तो ॥ तत्र पश्यति हलानि वहन्तानि । तेहि हलेहि दीर्घको च मंडूको च उत्क्षिप्ता । मंडूको गृहीतो भोजनार्थं । सो पि दीर्घको कुमारेण क्षिप्तो ॥ तं च बोधिसत्वेन दृष्टं । दृष्ट्वा च बोधिसत्वस्य महान्तं संवेगमुत्पन्नं ॥

कामं शरीरं समं तप्यति जीवितं च
प्राप्स्यामि अद्य अमृतं भवविप्रमोक्षं ।
वीर्यं मया हि प्रतिसंहरितुं न शक्यं
वेलाय व सलिलवेगं यथाणर्वस्य ॥

जम्बुच्छायायां बोधिसत्वो निषण्णो पूर्वाह्णे परिवृत्ते दिवसकरे छाया बोधिसत्वं न जहाति । सवितर्कं सविचारं प्रथमं ध्यानमुपसंपद्य विहरति ॥ हिमवन्तपार्श्वतो पंच ऋषयो वैहायसेन विंध्यं गच्छन्ति । ते तत्र बोधिसत्वस्य न शक्नोन्ति उपरिगन्तुं ॥

वयमिह मणिवज्रकूटं गिरिं मेरुमभ्युन्नतं तिर्यगत्यर्थविस्तारिकं ।

2. C °dâya puṇyaṁ° BC °satvânâṁ B °nâṁ nâsyâ la°. — 3. BC °kâye niva° B °vartitate ekaṁ ‖ C °rttaye | evaṁ çuddho°. — 4¹. C °rddhaṁ umâre° C °rddhâvirddhâvito | B °vitâ | . — 4². BC °kramante kṛi° C °grâma nuprâptaḥ ta°. — 5. C °çyati phalâni° B °ntâni tehi° C °ntâni phale°.

6¹. C °rghako ca mandû ca u° B °maṁdû ca u° BC °kshipta dirghako maṁdû°. — 6². BC °nârthe so pi°. — 7¹. BC °pto taṁ ca°. — 7². C °tvena dṛishṭvâ B °dṛishṭvaṁ dṛi°. — 7³. B °shṭvâ bo° BC °ntaṁ vega ° nnaṁ kâmaṁ°. — 9. B °samantasyati ji° C °samantasya ji° BC °psyâmi | a° B °kshaṁ vî° C °kshaṁ viryya ma°.

11. C °maye hi pratisaṁhati | taṁ na ça° B °haritaṁ na ça° BC °çakya velâ iva sali°. — 13. B jaṁbuchâyâ° C jaṁbunadachâyâ ° satva ni° BC °sharṇṇo pû° C °rinirvṛitte di ° tvaṁ ca ja°. — 14¹. C °tarkka savicâ° BC °thama dhyâ° C °dhyânaṁ upasaṁ°. — 14². BC °pârçve toyaṁ ca(C °va) ṛi ° hâyena viṁdhyaṁ(C °vindhyaṁ) ga°. — 15. BC °çaknoti u ° ntuṁ va°.

17. C vadâmiyaṁ anyakuṭi mirimeru° B vayam iva anyakuṭiṁ giriṁ meru ° dgataṁ tenekaçotre sasthâvarâ jaṁgama i..ha kâra° C °dgataṁ tenaikaçrotasaṁsthâvarâ jaṁgam evaṁ saha°.

गज इव सहकारशाखाकुलां वृक्षवृन्दां प्रदारेत्व निर्धाविता नैकशः ॥
वयममरपुरे पि शक्ता गता देवगन्धर्ववेश्मानि चोर्ध्वं नभे निश्रिताः ।
वयमपि वनषण्डमासाद्य सीदाम भो क[115b]स्य लक्ष्मी निवर्तेति ऋद्धेर्बलं ॥

देवा गाथां भाषन्ति ॥

नृपतिपतिकुलोद्गितो शाक्यराजात्मजो बालसूर्यप्रकाशो विदू ।
रवितरुणप्रभातिरेकेहि वर्णप्रभैः लक्षणैर्लक्षितांगो वरैः ॥
अयमिह वनमाश्रितो ध्यानचिन्तापरः ..... पार्थिवः ।
गुणशतसमकोटिसंवर्धितस्तस्य लक्ष्मी निवर्तेति ऋद्धेर्बलं ॥

सो हि तिमिरान्धकारे प्रादुर्भूतो प्रदीपकः ।
अयं तं प्राप्स्यते धर्मं यज्जगं श्वासयिष्यति ॥
लोके क्लेशाग्निसंतप्ते प्रादुर्भूतः महामुनिः ।
अयन्तं प्राप्स्यते धर्मं यज्जगं ह्लादयिष्यति ॥
शोकसागरकान्तारे यानश्रेष्ठमुपस्थितं ।
अयं तं प्राप्स्यते धर्मं यज्जगं तारयिष्यति ॥
महासन्सारकान्तारे विप्रनष्टं जगत्त्रयं ।
अयं मार्गवरं श्रेष्ठं देशयिष्यति चक्षुमान् ॥
संसारचारके बद्धा दीर्घरात्रमियं प्रजा ।
अयं बन्धनमोक्षं च धर्मराजा करिष्यति ॥

1. B jaṁgama i..ha kâra° C jaṁgam evaṁ saha° BC °khâkulaṁ vṛikshâṁ vṛindâ(C °vṛiṁdâ) pradâ° B °pradâloka ni° C °pradâronta nirddhâvayitvâ nai° B °rddhâvitvâ naikaçaḥ va°. — 2. C vayaṁm amapure° BC °pureshva çaktâ° BC °ndharvâveçmâ(B °rvaveçâ)ni nihçritâḥ | . — 3. B °m api maṁsamâsâdya C °m api samâsâdya prasidâ° BC °kasya cil lakshmî° C °varttani ṛiddhiba° BC °laṁ de°. — 4. B deva gâ° C devaṁ gâ° BC °shati ‖ . — 5. BC nṛipati yathâ kulo° C °jo bârasuryapra° BC °kâço viṁ(C vi)duravitarunaḥ ravitaruṇaprasupta(C °ṇavraçakta)r ekavarṇṇa°.

6. B °r lakshitâṁ gauravaiḥ aya° C °kshitâṅgauravarṇṇo | aya°. — 7. BC °vanasha(C °kha)ṇḍam âsṛitya dhyâ° B °paraḥ pârthi° C °paramapârthi° BC °vaḥ guṇa°. — 8. B °çataḥ samakoṭisamvarddhi°. — 9. B so ha timi° C so baṁ timi° BC °timilândha ° pradipo yaṁ âyataṁ prâ°. — 10. B °rmaṁ | ya° C °jjaga svâsayi°.

11. C °saṁpapte prâdubhûtaḥ°. — 12. C ayaṁ taṁ prâ ° dharma yaj jataṁ hlâ°. — 13. C °kântore yâ° BC °çreshṭam u°. — 14. BC ayaṁ prâ°. — 15. B °jagad ayaṁ | C jagatayaṁ.

16. B ayaṁ ya mâ° C ayaṁ ca mâ° BC °çreshṭaṁ de°. — 17. C °câlake ba ° rgharâshṭraṁm iyaṁ pra° B °râtram iyaṁ pra°. — 18. B °kshaṁ dha°.

आक्रुष्टे शूरमिच्छन्ति मन्त्रेषु कुशलं सदा ।
सहायं अर्चयन्ते खु अन्नपानेन सुप्रियं ॥

राजा भक्तवेलायां कुमारं पृच्छति । कहिं कुमारो आहारं करिष्यति ॥ राज्ञो श्रुत्वा कंचुकीया च वर्षवरा च किराता च वामनका च समन्तेन प्रधाविता कुमारं मार्गन्ता ॥ कुमारो जम्बुच्छायायां ध्यायन्तो कंचुकीयेन दृष्टो परिवृत्ते दिवसकरे जम्बुच्छाया कुमारं न जहाति ॥ कंचुकीयो दृष्ट्वा विस्मितो महाभागो कुमारो यस्य अचेतना छाया न जहाति ॥ कंचुकीयेन राज्ञो शुद्धोदनस्य निवेदितं ॥

व्यावृत्ते तिमिरनुदस्य मण्डलस्मिं
ध्यामाभं शुभवरलक्षणाग्रधारिं ।
ध्यायन्तं गिरिमिव निश्चलं नरेन्द्र
सिद्धार्थं न जहति जम्बुच्छाया ॥

राजा कंचुकीयस्य श्रुत्वा येन कुमारस्तेनोपसंक्रमन्तो पश्यति जम्बुच्छायान्तां । राजा विस्मितो आह ॥

ऊतासनो वा गिरिमूर्धनस्मिं
शृङ्गीव नक्षत्रगणावकीर्णो ।
ह्लादेति गात्राणि निरीक्ष्यमाणो
ध्यानस्थितो तैलप्रदीपकल्पो ॥

राजा आह ॥ महाभागो अयं यस्य अचेतनवन्ता पि तावा संनमन्ति ॥ राज्ञा शुद्धोदनेन बोधिसत्वस्य जम्बुच्छायागतस्य पादा वन्दिता ॥

1. BC °shṭe sûra° C °nti yenteshu kuvalayaṁ saha arca° B °shu ku lavaṁ sahâ° L °çalaṁ sahâ°. — 2. B sahâryaṁ | a° BC °arcayante shu a°. — 3¹. BC °chati ka°. — 3³. B °kiyâ ca kukra ca varsha° BC °varâ ca virâ° B °râgâ ca vâ ° samaṁtena pi dhâvi° BC °vito kumâ° C °rganto ku° B °ntâ ku°. — 5. BC °mâraṁ jambu ° dṛishṭvâ pari° C °parinirvṛitte° C °châyâṁ ku°.

7. BC °ditaṁ vyâha°. — 8. BC vyâharante(C °ntaṁ) timi° B °raudayama° C °ra udayarkkamaṇḍalâsmiṁ dhâmâṁ dhuvarala° B °dhyâmâṁ bhavadhûvarala° BC °riṁ dhyâ°. — 10. BC °ntaṁparam iva bale(C °la) narendraṁ si° BC °jahâti jaṁbuchâyâ | .

12. C râjâṁ kaṁ° BC °yântaṁ ‖ . — 14. B °sane vâ gi° BC °rddhanismiṁ° B °kirṇṇaṁ hlâ°.

16. C °gâtrâni niri° BC °nirîkshamâṇo° BC °tailadîpakalpo ‖ . — 18². C °tâvâ sanama°. — 18³. C râjâ çu° BC °sya jaṁbuchâ° C °châyâṁ ga°.

राज्ञो शुद्धोदनस्य एतदभूषि ॥ यथा कुमारस्य शान्तेषु ध्यानेषु चित्तं रमति सो खल्वेव असितस्य ऋषिस्य सत्यो व्याकरणो भविष्यति ॥ तेन राज्ञा कुमारस्य विस्तीर्णमन्तःपुरमुपस्थापितं यथा कुमारो गृहे अभिरमे[116a]य ॥ राज्ञा कन्यानामर्थाय विविधं नानाप्रकारं अशोकभाण्डं कारापितं । कपिलवस्तुस्मिं च नगरे घोषणा कारापिता । सर्वाहि कन्याहि राजक्यं उद्यानं निर्धावितव्यं सर्वार्थसिद्धो कुमारो कन्यानामाभरणानि विश्राणेष्यति ॥ तहिं उद्याने राजाणत्तीये कपिलवस्तुतो बह्वनि कन्यासहस्राणि निर्धावितानि ॥ महानामस्य शाक्यस्य यशोधरा नाम धीता महतीये समृद्धीये निर्धाविता ह्रियायन्ती कुमारमक्षीना ॥ यदा भगवानभिनिष्क्रान्तो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो प्रवृत्तप्रवरधर्मचक्रो तं भिक्षुहि श्रुतं ॥ भगवतो कुमारभूतस्य उद्यानवनगतस्य कन्यानामाभरणानि विश्राणेन्तस्य यशोधरा ह्रियायन्ती कुमारस्य अक्षीना ॥ भिक्षु भगवन्तं पृच्छति ॥ कथं भगवं यशोधरा भगवतो कुमारभूतस्य ह्रियायन्ती अक्षीना ॥ भगवानाह ॥ न हि भिक्षवः इदानीमेव यशोधरा मम ह्रियायन्ती अक्षीना । अन्यदापि एषा मम ह्रियायन्ती अक्षीना ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवो ऽतीतमध्वानं नगरे वाराणसी काशिजनपदे ब्राह्मणो कौशिकसगोचो । सो कामेषु आदीनवं दृष्ट्वा अनुहिमवन्तं ऋषिप्रव्रज्यां प्रव्रजितो ॥ तेन तहिं अनुहिमवन्ते गंगाकूले आश्रमं मापेत्वा पूर्वराचापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन वाहितकेन मार्गेण चत्वारि ध्यानान्युत्पादितानि पंचाभिज्ञा सा-

1¹. C râjâ çu ° nasyaitad a°. — 1². B °cittañ namati | sâ kha° C °cittañ na ramati | sâ kha°. — 2. BC °pitañ | ya° B °mârâ gri ° ramaya | C °rameyâ kañnyâ°. — 3. C °prakâre aço° B °kabhaṇḍañ kâ°. — 4. BC °pitâ sa°. — 5. BC °rvâhi kañnyâhi° C °râjaçâ kyañ u° BC °mâro kañnyâ° B °viçráneshyati | .

6. C tahim udyâ° BC °stuno bahûni kañnyâsa°. — 7. B °tiya samri° C °vitâ hriyâyañti ku° B °yâyanti | ku ° llina ya° C °llino câ ya°. — 8. BC °n abhikrânto° C °k sañbuddham abhisañbuddhaḥ pra° B °vritto prava ° cakrañ | tañ° C °cakrañ bhikshu° B °çrutañ bha°. — 10. C °kañnyâ° BC °çrâmanta° C °yâyanti ku° B °nti | kumârasya sallinâ bhi°.

12¹. C °thañ bhagavan yaçodharâñ bhaga ° sya hriyâ° B °yâyanti allinâ ‖ . — 13¹. C °kshavo idânimm evañ yaço° B °dânimm eva° BC °dharâ nâ mama° C °ma hriyâ° B °yâyantri a°. — 13². C °ma hriyâ° B °yâyantri a°. — 14¹. C °âhatsuḥ | . — 14². C °gavân | . — 14³. C °n âha ‖ na bhikshavaḥ bhûta°.

16. BC °m adhvâne naga° C °no kauṇḍinyasagrotro° BC °tro so kâ°. — 17². C °hiñ amuhima ° çrama mâ° C °pûrvâparârtrapa° B °râtrapararâtrañ | jâ ° yuktañ na vi° C °kenargeṇa ca ° pañcabhi ° tkṛito candra° B °tkṛitâ candra°.

ज्ञात्कृता । चन्द्रमसूर्यपरिमार्जको महर्द्धिको महानुभावो ऋषि संवृत्तो न च संविभागशीलो ॥ तस्य दानि ज्ञातिको कायस्य भेदान्नन्धर्वकायिकेषु देवेषूपपन्नो पंचशिखो नाम गन्धर्वपुत्रो ॥ सो देवभूतो तं कौशिकं स्मरति । कहिं कौशिक आकाशे प्रवृत्तजीवो ति मृतो ति ॥ सो समन्वाहरति । पश्यति तं कौशिकं ऋषिप्रव्रज्यां प्रव्रजितं । अनुहिमवन्ते गंगाकूले स आश्रमे प्रतिवसति असंविभागशीलो ॥ तेन शक्रस्य देवानामिन्द्रस्य आरोचितं ॥ यो मम मनुष्यभूतस्य ज्ञाति प्रियो मनापो सो ऋषिप्रव्रज्यां प्रव्रजितो अनुहिमवन्ते गंगाकूले आश्रमपदे प्रतिवसति सो च असंविभागशीलो । तस्य अनुग्रहार्थाय उपसंक्रमेम संविभागस्मिं नियोजेम ॥

शक्रो दानि कौशिकस्य ऋषिस्य अनुग्रहार्थं आहारदेशकाले [116b] चन्द्रमसूर्यैहि सार्धं मातलिना च संग्राहकेन पंचशिखेन च देवपुत्रेण ब्राह्मणवेशमभिनिर्मिणित्वा ..... कौशिकस्य ऋषिस्य आश्रमं आहारदेशकाले एकमेको उपसंक्रान्तो । स च सुनखो नानाप्रकाराणि उच्चावचानि वर्णानि उपदर्शेति ॥ कौशिक आह ॥

नाहं क्रिणामि नापि विक्रिणामि
न चापि मे सन्निधि अस्ति किंचित् ।
परीत्तरूपं मम भोजनं इमं
स्यामाकप्रस्थं नलमेषो दुविन्नं ॥

शुनख आह ॥

अल्पातो अल्पकं दद्यात् अनुमध्यातो मध्यिमं ।

1. C °mârjanto maha° BC °çilo tasya°. — 2. C °ko koyasya bhe ° rvakâyeshu de° B °pañcâçisho nâ° C °pañcâçishyo nâ° BC °tro so de°. — 3¹. C °çika smara°. — 3². B °kauçikañ â° C °çikam âkâçe pravishṭaṁ jiva° B °vrittañ jiva°. — 4¹. C °samatvâha° BC °rati pa°. — 4². BC °jitañ anu°. — 5. B °kûle sâçra ° sati | a ° çilo tena° C °çilo tasya anugrahârtha tena°.

6². C yo ma manushya° C °jitaḥ | anu° B °jito | anu° BC °sati | so ca° C °ca ahañvibhâ° BC °çilo tasya°. — 8. C °rthâya sañkrâmo sañvibhâ ° yojemaḥ | . — 10. B °sûryehi ca sârddhaṁ | mâ° C °mâtarinâ ca sañ ° ca çishyena ca de ° treṇa veçmabhini° BC °nitva kauçi° C °shisya âhâraṁ âçrâmaṁ deçañkâle e ° krântaḥ tasya ca suna°.

13. C tasya ca su ° ccâvaccâni va°. — 15. C nâhañ kriyâmi nâpi me sa° B nâhañ kriṇâmi nâpi vikriṇâmi° C °sti kiñcit paritarû°.

17. C paritarû °ima syamâka° BC °sthaṁ nâlam e° C °m eko dubhinnañ ‖ . — 19. C sunakho âha ‖ . — 20. C °dadyâd anuma° B °dyât | a° C °dhyâto paccinañ | .

IMPRIMERIE NATIONALE.

बङ्कातो बङ्कं दद्यात् अदानं नोपपद्यति ॥
नत्वाहं कौशिक ब्रूमि भुंजाहि च ददाहि च ।
आर्यमार्गसमापन्नो एकांशं विन्दते सुखं ॥

चन्द्रो पि उपसंक्रान्तो ॥ कौशिको आह ॥

नाहं क्रिणामि नापि विक्रिणामि
न चापि मे सन्निधि अस्ति किंचित् ।
परीत्तरूपं मम भोजनं इमं
स्यामाकप्रस्थं नलमेषो त्रयाणां ॥

चन्द्र आह ॥

वडिशं सो संगिलति दीर्घसूत्रं अयोमयं ।
यो अतिथिस्मिं आसीने अदत्त्वा भुंजति भोजनं ॥
नत्वाहं कौशिक ब्रूमि भुंजाहि च ददाहि च ।
आर्यमार्गसमापन्नो एकांशं विन्दते सुखं ॥

सूर्यो पि उपसंक्रान्तो ॥ कौशिक आह ॥

नाहं क्रिणामि नापि विक्रिणामि
न चापि मे संनिधि अस्ति किंचित् ।
परीत्तरूपं मम भोजनं इमं
स्यामाकप्रस्थं नलमेषो चतुर्णां ॥

सूर्य आह ॥

मोघं तस्य ऊतं भोति मोघं चापि समाहितं ।

1. BC °dyât âdânaṁ vo(C °co)papadyati | . — 2. B °naitvarhaṁ kau° C °na tvahaṁ kau° BC °çika krumi bhuṁ° B °jâhi dadâ°. — 3. B °rgasampannâ e° C °kâñça vi°. — 4¹. C °krânto ekâçaṁ vindate suta | kau° B °nto kau°. — 4². C kauçika âha ‖ . — 5. B nâhaṁ viçrâminâpi vi° C nâhaṁ vikriṇâmi napi kriçâmi na câpi saṁnidhi a° B °câpi sanni ° cit parî°.

8. C °syâmâshaprasthaṁ° BC °sthaṁ nâlam e° B °ṇâṁ ca°. — 10. BC vadiçaṁ so gila(C °ra)ti° C °yaṁ ati° B °yaṁ yo ati°.

11. BC °smiṁ | â° B °âçinenânudatvâ° C °âsîd anenânudatvâ°. — 12. BC natvahaṁ kau° B °çika kruhi bhuṁ° C °çika krumi bhuṁ°. — 13. BC °nno evaṁ saṁvin(C °viṁ)date su°. — 14¹. C sûryo pi tu upasaṁpanno evaṁ saṁvidyate sukhaṁ ‖ B °nto kau°. — 15. BC °vikrinâmi na° B °me | saṁni° C °me sannidhi° BC °cit parî°.

17. BC °janaṁ | i° C °syâmâshapra° B °kapasthaṁ° BC °sthaṁ nâlam e ° rṇṇâṁ‖

20. BC sohaṁ ta ° ti mohaṁ câ°.

यो अतिथिस्मिं आसीने अदत्त्वा भुंजति भोजनं ॥
नत्वाहं कौशिक ब्रूमि भुंजाहि च ददाहि च ।
आर्यमार्गसमापन्नो एकांशं विन्दते सुखं ॥

मातलि पि उपसंक्रान्तो ॥ कौशिक आह ॥

नाहं क्रिणामि नापि विक्रिणामि
न चापि मे संनिधि अस्ति किंचि ।
परीत्तरूपं मम भोजनं इमं
स्यामाकप्रस्थं नलमेषो पंचानां ॥

मातलि आह ॥

सत्यं तस्य ऊतं भोति सत्यं चापि समाहितं ।
यो अतिथिस्मिं आसीने दत्त्वा भुंजति भोजनं ॥
नत्वाहं कौशिक ब्रूमि भुंजाहि च ददाहि च ।
आर्यमार्गसमापन्नो एकांशं विन्दते सुखं ॥

शक्रो पि उपसंक्रान्तो ॥ कौशिक आह ॥

नाहं क्रिणामि नापि विक्रिणामि
न चापि मे सन्निधि अस्ति किंचित् ।
परीत्तरूपं मम भोजनं इमं
स्यामाकप्रस्थं नलमेषो षण्णां ॥

शक्रो आह ॥

सरस्वतीं सो जुहोति चाऊतां गमये अपि ।

1. C yâ ati°. — 2. C natvaha kau° BC °çika krumi bhuṁ°. — 3. C °rgasya saṁpanno ekâñça vi°. — 4¹. BC mâtari pi° B °krântau kau° C °krânto evaṁ samviṁdate sukhaṁ | kau°. — 5. C °vikriṇâmi° C °me sannidhi asti kiṁcit | pa°.

7. C °ima syâmâshapra° BC °sthaṁ nâlam e° C °sho pañcânâṁ ‖ . — 9. C mâtarî â°.

10. B satyaṁ satya hutaṁ bho° C satyaṁ satyaṁ hutaṁ bho°.

11. B °âçine da° C °âçine da°. — 12. BC natvahaṁ° B °ka kruhi bhuṁ° C °ka krumi bhuṁ° BC °dâhi ca â°. — 13. C °rgasaṁpanno eshâñçaṁ vi°. — 14. C °nto evaṁ savi-ndate sukhaṁ | kau°. — 15. BC na câpi san (C °saṁ)nidhi a°.

17. BC °janaṁ | i° C °syâmâshapra° BC °sthaṁ nâlam eshâ(C °shâṁ) sharṇṇâṁ ‖ . —

20. BC °svati so ju° B °juhâti câhadâṁ gama° C °câhu âgama° L °câhutâṁ sama° BCL °mayâm api | .

यो अतिथिस्मिं आसीने दत्त्वा भुंजति भोजनं ॥
नत्वाहं कौशिक ब्रू[117ᵃ]मि भुंजाहि च ददाहि च ।
आर्यमार्गसमापन्नो एकांशं विन्दते सुखं ॥

कौशिक आह ॥

उदारवर्णा इति ब्राह्मणा इमे
अयं च वो सुनखो किस्य हेतु ।
उच्चावचां वर्णनिभां निदर्शये
आख्याथ मे को नु भवे भवन्तो ॥

शक्र आह ॥

चन्द्रो च सूर्यो च इहागता ते
अयं च सो मातलि देवसारथिः ।
अहं च शक्रो चिदशान ईश्वरो
अयं च सो पंचशिखो ..... ति ॥
यस्यैष प्रतिगृह्णाति अन्नं च पानं च कौशिक ।
पाणिस्वरं कुम्भथूनं मृदंगानां स्वराणि च ।
सुप्तं न प्रतिबोधेन्ति प्रतिबुद्धो च नन्दति ॥
.....
तुवं नो ज्ञाती पुरिमासु जातिषु
त्वं कौशिका मत्सरिपापधर्मः ।
तुह्यानुकंपाय इहागता स्म
मा पापधर्मो निरयं व्रजेसि ॥
ये मत्सरी रोषकपापधर्मा

1. B ye tithi° C yâ tithismiñ açine da° B °âçîne adatvâ°. — 2. BC natvahaṁ kauçika krumi bhuṁ°. — 3. C °rgasya saṁpanno°. — 5. B °hmaṇa i ° kho kimasya hetuḥ | C °kho kima hetuḥ | .

7. B °ccâcavo varṇṇa° C °ccâvaco varṇṇa ° bhâṁ darçaye na âkhyâ° B °rçaye nanu âkhâtamesho nu bha° C °ko anubha°. — 10. C °ihogatau ayaṁ° B °hâgato ayaṁ° C °mâtari de°.

12. C °çânam îçva° B °çâna içva° BC °ro | ayaṁ° C °yaṁ ca paṁcaçirshoti | yasyai° B °paṁcaçishoti || yasyai°. — 14. B °kauçikaḥ pâṇi° C °çika pâṇi°. — 15. B °mbhabhûyaṁ mṛi° C °mbhatûṇikaṁ mṛi° BC °daṁgâhaṁ varâṇi su°.

16. BC suptânâṁ pra ° nti | pratibu°. — 18. BC °jñâti pu° B °purimosu jâtishu | tvaṁ° BC °çiko matsa° B °tsariyâpadharmaḥ tu° C °tsarirashakapâpadharmâ tu° — 20. B C °sma | mâ°.

22. B °dharmo pra° C °çravaṇâbrâ° BC °ṇânâṁ pâ°.

प्रद्वेषका श्रमणब्राह्मणानां ।
पापानि कर्माणि समाचरित्वा
इतो च्युताः ते निरयं व्रजन्ति ॥
ये चेह दानानि ददन्ति पण्डिता
प्रसन्नचित्ताः श्रमणब्राह्मणेषु ।
पुण्यानि कृत्वा इह जीवलोके
इतो च्युतास्ते सुगतिं व्रजन्ति ॥

कौशिक आह ॥

एषो अद्यैवं करिष्यामि पुण्यं
दास्यामि दानं श्रमणब्राह्मणेषु ।
एतेहि दद्यादहमन्नपानं
नाहं अदत्त्वा अमृतं पि पास्ये ॥
एवं च मे ददतो सर्वकालं
भोगा च मे व सर्वा चिपिहन्ति ।
ततो अहं सुगतिं प्रव्रजिष्यं
प्रहाय कामानि तथाधिकानि ॥

नगोत्तमे गिरिवरगन्धमादने
मोदेन्ति देववराधिपात्मजा ।
उपागता ऋषिवर सर्वि पूजितुं
सुपुष्पितां द्रुमवरशाखां गृह्णिय ॥
शुचिं सुगन्धां चिदशेहि सत्कृतां
सुपुष्पितां अमरवरेहि सेवितां ।

2. C pâpâṇi dharmâṇi° B °rmâni sa° C °ito cuto te nilayaṁ° BC °janti yad iha dâ°. — 4. C °ni dadâti pa° C çravaṇabrâ° B °brâhmaṇabrâhma°.

6. C °ita cyu°. — 9. B °dyaiva karishye pu° C °rishya pu ° çravaṇabrâ°.

11. C °hi ete dânaṁ dadyâ nâhaṁ° L °hi ete dadayehi dânaṁ nâ° B °dyâd dânaṁ nâhaṁ° BC °adatvâ amṛi° C °pipâsâ | . — 13. C °bhogâya ca me° BC °me vâ sarvâ kshipi-(C °pṛi)hanti | L °me vâ sarva kshipihanti | . — 15. BC °ahaṁ pravrajishyâmi prahâ° C °dhikâmâni nago°.

17. BC °ragaṁdhamâ° B °dane | mo° C °modanti deva amarâdhi°. — 19. B upâgamâ ṛi° C °game ṛi ° sarvapû ° gṛihnîya çu° B °gṛihniya çu°.

21. BC çuciṁ | sugandhâ trida ° tkṛitâ supushpitâ ama° B °sevitâ tâṁ° C °sevitâḥ tâṁ°.

शाखां ददेन्सुर्नम अस्तु मारिष
यथैव मो शक्र तथैव सो तुवं ॥
तां याचमानां अनुद्रुत्य ब्राह्मण
इत्यब्रीषि कलहं उदीरये ।
न मह्यं पुष्पेहि इहार्थ विद्यति
या चैव वो श्रेयतरा (गृह्णातु) ॥
तद्दियं त्वं एव समीच ब्राह्मण
जानाहि मो मारिष या नु श्रेया ।
यस्यैव नो मारिष तां दयिष्यसि
सा एव नो श्रेयतरा भविष्यति ॥
अकार्यमेतं वचनं सुगात्रिका
स ब्राह्मणो क्रोधशब्दं वियाहरे ।
गत्वान भूताधिपतिं हि पृच्छथ
सो एव वो ज्ञास्यति या नु श्रेया ॥
तद्दापि तायो परमार्थदर्शिनो
उदारिका वर्णवरेण अर्थिका ।
गत्वान वोचन्तिदशाधिपस्य
जानाहि मो मारिष का नु श्रेया ॥
तान्दृष्ट्वा अ[117b]नात्तमना पुरंदरो
इत्यब्रवीत् आत्तमनो सर्वेषु ।
..... युष्मे सदृशा सुगात्रिका

1. B tâm hi çâkhâm dadet sarvamgamâsi mâ° C tâm hi çâkhâm dada sarvâdgamâsi mâ° C °thaivam mo ça°. — 3. B tâm pâcamâ° C °mânâm anu° BC °hmaṇa | i° C °bravîmi kalaham udî°. — 5. B °hyam pujyam pushpe° C °hyam puṇyam pushpe° BC °yâ yeca bodha çreyatarâ sopi ta°.

7. BC °yam tvâm eva° B °mîkshe brâ° C °hmaṇâ jâ° BC °nâhi mârsha jânu çreyâ ya°. — 9. C yasya evam naḥ mârisha tvadadishyasi° B °syaiva ro mârisha tvam dayi° BC °shyasi | sâ° C °evam no çre°.

11. BC °triko brâhma° C °hmaṇam krodhaça° BC °bdam vyâkare tvâna°. — 13. C °patim hi pri° B °patim hi mṛicha° BC °tha | so eva(C °vam) vo jñâtisya(C °sye)ti yâ tu çreyatarâ pi tâ°. — 15. B °rika varṇṇabalena ° arthiko tâ gatvâ° C °varṇṇabalena ° arthiko âgatvâ°.

17. C °tvânaivam avo° BC °vocat | tri ° hi mâm mârsha kâ°. — 19. C °purandaro° BC °vit | â ° rveshu yushme°.

21. B °driço su° BC °sugâtreko rtheha pûrve ka° C °rayet | .

को येहपूर्वं कलहं उदीरये ॥
यो सर्वलोके चरति महामुनिः
नामेन सो नारदो सत्यविक्रमो ।
सो अब्रवीत्पर्वते गन्धमादने
गत्वान भूताधिपतिं हि पृच्छथ ॥
इतो सो उत्तरतो दिशायां
गंगाय कूले हिमवन्तपार्श्वे ।
सो कौशिको दुल्लभपानभोजनो
तस्य सुधां प्रेषयि देवसारथिः ॥
अग्निं जुहन्तस्य प्रतिष्ठतो मम
प्रभंकरो लोकतमोनुदो यथा ।
आदित्यलोकस्मिं तथैव ईर्यसि
का देवता किस्य इहागतो सि ॥
शंखोपमं श्वेतशतुल्यसन्निभं
मनोज्ञगन्धं प्रियरूपदर्शनं ।
न दृष्टपूर्वं मय चक्षुषेदृशं
का देवता किन्तु ददासिदं मम ॥
अहं महेन्द्रेण महर्षि प्रेषितो
सुधाहरिं त्वां त्वरितं उपागमि ।
जानाहि मां मातलिं देवसारथिं
भुंजाहिमां कांक्षिषु भोगमुत्तमं ॥
भुक्त्वा हिमां द्वादश .... हि पापका
क्षुधापिपासां अरतिं ज्वरं क्रमा ।

2. BC °nih mâmena ° kramo so a°. — 4. BC °vit || parvate° C °rvate audha°.

6. C °uttarâto° C °gamgâkûle°. — 8. BC °jano | ta° C °rathi a° B °rathih a°. — 10. B agnijuha° C agnihutam tasya pratisthato° B °tishṭato°.

12. C °yathaivam ishyasi kâ° B °smim yatheva iryasi° C °vatâ kasya ihagatâ si | . — 14. BC °khopamâm çeta° C °tamatulyasamnibhâ mangandhâm pri° B °samnibhâm manogyagandhâm pri° BC °rçanâm na dṛi°.

16. BC °pûrve ma° C °mayam cakshuḥ edṛiçakâ de° BC °vate kin tu adâ° C °dâsidam°. — 18. C °ndreṇa mârsha preshitâḥ su° BC °sudhâtari mâm(C °mâ) tvari°. — 20. C °mâtari de° B °tali deva° C °hi mâ kâm° B °bhojam u° C °bhojanam uttam | .

22. BC °dvâdaçehi pâ° C °pakam kshu° B °pakât kshudhâ° BC °pipâçâm ara ° kramâ kro°.

क्रोधोपनाहं च विवादपैशून्यं
ग्रीतोष्णतन्द्रीतरसं च उत्तमं ॥
न मातले कल्पति मह्य भुंजितुं
पूर्वं अदत्त्वा इति ब्रुवन् अनुत्तमं ।
न चापि एकस्य न मह्य वर्णितं
असंविभागो हि सुखं न विन्दति ॥
मित्रं औपाधिकं पारिपन्थिका
स्त्रीघातका ये पहरन्ति अर्थं ।
सर्वे पि ते मत्सरिने समा मता
प्राप्तं अदत्त्वा अमृतं पि नासे ॥
ता प्रेषिता देवराजेन आत्मजा
कन्या चतस्रो तपनीयसन्निभा ।
सुधां पि आदाय प्रतिग्रहार्हां
तं आश्रमं यत्र अभूषि कौशिकः ॥
दृष्ट्वा तु ताः अर्थदर्शी मतीमां
प्रभासयन्तीयो अनन्तराश्रिताः ।
स्थिता चतस्रो प्रमदा चतुर्दिशं
सो दानि कौशिक अध्यभाषिथ ॥
पुरिमां दिशन्तिष्ठसि देवते त्वं
अलंकृता तारवरा व ओषधी ।
पृच्छामि ते कांचनवेदिविग्रहे

1. B °vivâdupai° C °vivâdan paiçunya çi° B °nyaṁ çitoshṇatantrivarasaṁ° C °ndrivarasaṁ°. — 3. B na pâtale° C °mâtare kalpayati mahyaṁ bhuṁ° B °iti kruvan° C °iti dhruvaṁ nuttamaṁ câpi°. — 5. C °mahyaṁ va° BC °vallitaṁ | asaṁ° C °bhâgaṁ hi su° BC °ndati mi°.

1. B °naḥ tanumasu° C °naḥ tanukasûkshmarasmibhiḥ stritâvadrasarasâvatî° B °khumarasmibhistritâ ca varasarasâvatî° BC °jihmanâ° B °lyabalâ ca di° C °lyavarâ ca di ° janaṁ sajñâyanî | B °jñâyanî | . — 3. BC °dadâ ca â° C °jânena baddha la° BC °lâṭe va bhrû-(B °va ru)mukhe ca ço°. — 4[1]. B °nîla vâshabalo bha° C °nîla vâshpabalo bha° BC °keçâ çâkya°. — 4[2]. BC °siṁho grî ° B °suvalakaṁbu° C °suvarakaṁcuka yathâ ovâhâ | B °thâ ovahâya jina samâ | . — 5. BC abhedyâ siṁ° C abhedyâ sihârârddha ° tmabhâvâḥ | B °bhâvo pra°.

6[1]. BC °ntâ vi°. — 6[2]. B viçishṭâ vâkya ° dra kalparipâka ka° C °dra kalpavipâkarohi i ° shamâṇo | sarve te lokam abhinamataṁ â° B °ṇaḥ sarves te lo ° ritvâ pri° C °ritvâ dṛishṭvâ daçanakhaṁ añjalihi ‖ . — 9[1]. C °gavâna viçu° C °bhikshum eta°. — 9[2]. C sâdhu sâdhu bhikshavaḥ yas tvaṁ tathâgataṁ etam a° B °m etem arthaṁ° C °pricchatitaṁvyaṁ | anyasi B °cchitavya manyasi ço°. — 10. C çobhanaṁ te bhi ° rimimâṁsâ° B °si evaṁ°.

11. C °bhâvanti | ye° B °nti | ye° C °ryâya hastaṁgato°. — 12. C °mato bhavishyati nâ° B °gato bhavishyati | . — 14. C °mûlo carito tehi bhi° B °caritâhi te hi bhi° C °bhikshus te satvâḥ yeshâṁ arthâya tvaṁ arthaṁ pa° BC °hâsatvânâṁ tvaṁ°. — 15. BC °bhikshû satvâ° C ° nâm arthaya tathâ ° cchitavyaṁ | anyasi yad idaṁ bo ° tvavârikoviçe ° sthitâ tvaṁ bhi°.

17. B svaṁ bhi° BC °bhikshû satvâ° B °cchati | ya° C °cchati | yad idaṁ bo ° ṇâyakonâṁ sarva° BC °sthitânâṁ bhi°.

थागतं परिपृच्छसि यमिदं बोधिसत्वानां महासत्वानां लोकपरिणायकानां सर्व-
संशयच्छेदप्रभेदकौशल्यसमन्वागमसंप्रस्थितानां । भित्तु सत्वानामर्थाय तथागत-
मेतमर्थं परिपृच्छेसि यमिदं बोधिसत्वानां महासत्वानां लोकपरिणायकानां दा-
नविशेषाभियुक्तानां क्षान्तिविशेषाभियुक्तानां ध्यानविशेषाभियुक्तानां प्रज्ञाविशेषा-
भियुक्तानां ॥ अथ खलु भगवां तायें वेलायें इमां गाथामभाषि ॥

तुषिते भवने दिव्य ओतरित्वा हिमसमो नागो भवित्व षड्विषाणो ।
राज्ञो अग्रमहिषीं प्रविष्टो कुक्षिं ततो त्रिसाहस्र प्रकम्पे लोकधातु ॥
तद् सुविपुल आभा सुवर्णवर्णा इमं सर्वं साहस्रलोकधातुं ।
उपरि यावभवग्रं प्रज्वलन्ते यद् जिनः कुक्षिं प्रविष्टो संप्रजानो ॥
शक्रशतसहस्रं सब्रह्मकोट्यो जिनं वरकुक्षिगतं नमस्य नित्यं ।
उपागमि दिवसे पि अर्धरात्रे न च व्रजि इमे अविसर्जिता कदाचित् ॥
तूर्यं च शतसहस्रसंप्रघुष्टं उपरि नभं स्फुटं सर्वदेवताहि ।
दिव्यं प्रहाय चन्दनस्य चूर्णं अथ पुनरन्ये पताकच्छत्रहस्ता ॥
..... दिव्या प्रवर्षि वरकुसुमा च उत्पलस्य ।
मधुकरकरविंका सुवर्णमाल्या याव जिनो कुक्षिं प्रविष्टो संप्रजानो ॥
यद् आयेथा बुद्धो सत्वसारो देवानं इन्द्रो धारये संहृष्टः ।
वस्त्रं विशिष्टं सुरुचिरं कौशिकेयं जाम्बुनदस्य समनिभं कांचनस्य ॥
यदा च भूमिस्थितो बोधिसत्वो सप्त पदां चक्रमे हृष्टचित्तो ।

2. BC bhikshû satvânâ(B °nâm)m arthâ° C °pricchasi | yad idam° B °cchesi | yam ida bo° C °dânaviçeshâbhiyuktânâm çîlaviçeshâbhiyuktânâm kshântiviçeshâbhiyuktânâm viryyaviçeshâbhiyuktânâm dhyâ°. — 5. C °gavân tâye ve° B °gâthâ abhâ°.

6. BC tushitabhava° C °vane oçiritvâ himasaso nâgo° B °okiritvâ°. — 7. BC °jño gramahim(C °hishim) pra° C °tataḥ tri° BC °prakampo lo° C °dhâtum suvi° B °dhâtu ta°. — 8. C suvi° B tadâ suvipu° BC °rṇṇavarṇṇâ(C °varṇṇo) hare i ° hasram lo ° tum upa°. — 9. C °yâvad bhavâgre prajvarante | yadâ jino ku° B upari yâvad bhavâgraḥ prajvalate | yadâ ji ° jâno çakra°. — 10. C sakrasatasaha° BC °hasrabrahmako° BC °jina va° B °namasi nityam u° C °namasyi nityam.

11. B upagami di° C upagâmi di° BC °se ti arddha° B °treṇa ca vrajime avi° C °treṇa va vajime avisarjjito ka°. — 12. B turyam çatasahasra praghushṭhaṁ u° C tûryyam çatasahasram praghu° BC °sphuṭe sa ° vatehi | . — 13. BC °vyam grahâya ca candanâ cû° B °cûrṇṇam ‖ a° C °cûrṇṇam atha° B °nye pakâka° BC °hastâ di°. — 14. BC divya pravarshi yadruma varaku° B °tparasya | . — 15. B madhukarikaraviṁka su° C madhukarakalaviṁka su° BC °mâlyâm yadâ ca ji° C °prajano | .

16 BC yadâ jâye jinasatva ° vânâm i° C °hṛishṭo va° B °shṭaḥ va°. — 17. C °çishṭo su° BC °sucirañ kâçikasmiñ jâ(B °ja)mbu° B °nibho kâñcanasya yadâ° C °nibhâ kâñ°. — 18. C °bhûmiñ sthitaḥ bo ° dâñ cañkrame hṛishṭo citto | .

अहं खु लोके असदृशं करिष्यं अन्तं जराय मरणक्रियाय ॥
तद प्रकम्पे वसुमति षड्विकारं आभा च मुक्ता दिशता समन्ता ।
दिव्या शब्दा प्रवादिता अन्तरीचे अशीति सहस्रा अभु देवतानां ॥
दिव्या च चूर्णा नभतो प्रवर्षे चन्दनस्य सुवर्णशुभा देवपुत्रा ।
मन्दारवेहि ओकिरे बोधिसत्वं प्रामोद्यजाता मरु हृष्टचित्ता ॥
एकूनत्रिंशो वयसा[203a]नुप्राप्तो परिपाचयित्वा जगद्बोधिसत्वो ।
त्यजित्व राज्यं रतनवरां च सप्त काषायवस्त्रो अभु बोधिसत्वो ॥
सो प्रव्रजित्व विदु बोधिसत्वो षड्वर्षयुगं चरे दुष्कराणि ।
सो मागधस्य विजितं प्रविष्टो ग्रामिकधीता दृशि बोधिसत्वं ॥
सुवर्णपात्रीं च उदग्रचित्तो भृंगारं गृह्य रतनविचित्रं ।
अष्टाङ्गुपेतं शुभपारिपूर्णं तद आचमेसि ऋषि बोधिसत्वो ॥
बलेनुपेतं सुरसंप्रणीतं गन्धेन च उपनये भोजनं च ।
एवं च क्षन्तं जने वेगजाता बुद्धो भवे कवचितो लचणेहि ॥
इमं च हीनं विजहिय दृष्टिभावं चरेय शुद्धं अशबलब्रह्मचर्यं ।
वर्जे कामं दुःखकरं रोगमूलं सेवेय बुद्धां हतरजनिष्किलेशां ॥
भाषित्वा गाथामिमां एवरूपां सेनापतेर्दुहिता हृष्टचित्ता ।
नमस्यमानांजलिय बोधिसत्वं मुंचित्वा अश्रु इमं वाचं भाषे ॥
सुलब्धलाभो महिपति बिम्बिसारो अशोकप्राप्तो परिवृंहिताज्ञो ।

1. C ahaṁ khalu lo° BC °sadriço karishyati anta(C ° ntaḥ) jarâmaraṇakṛiyâ (C °ripâ)-ya | . — 2. BC tadâ prakampe° B °sumati sha° C °sumatâm sha° B °ram | â° C °samantâḥ di° B °ntâ ca di°. — 3. BC °vyâ ca çabdâ pravâditam antarikshe | açîti(C °tim a) bhû de ° nâm di°. — 4. C °cûrṇṇaṁ nabhâto prapato canda° B °rṇṇâ nabhâto prapata canda° C °sya subhavarṇṇa de° B °suvarṇṇaṁ çubhaṁ | de° BC °trâ mandâ°. — 5. C °jâto maru°.

6. BC °vayase(B ° senu)nuprâ ° satvâ | . — 7. BC tyajitvâ râ° B °jyaṁ ratnavarâṁ° C °ratanaṁ varâṁ° B °abhûd bo ° tvo so pra°. — 8. C °viduḥ bo°. — 9. C °pravishṭaḥ tadâ grâ° B °shṭo tadâ grâ° C °dhîtâ tâdṛiçi bo° B °dṛiçi bo°. — 10. C °pâtri ca u° BC °bhṛiṁgâra gṛihyâ(C ° hya) ratanaṁ vici°.

11. B ashṭâgupe° BC °rṇṇaṁ tadâ âcame(C ° se)si ṛi ° tvo bale°. — 12. B °taṁ gadhena ca u° B ° janaṁ | . — 13. BC °bhaveya kava°. — 14. C °jahiya bhâvaṁ° BC °çavalubra° C °caryya | . — 15. BC varjeya kâ° B °kâmi duḥkhîkarâṁ° C °kâmâṁ duḥkhakarâṁ ro ° lâṁ sevaya buddhi hata ° çân | .

16. B bhâshitvaṁ gâthâṁ imân tava evarû° C bhâshitva gâthâ imâṁ tad evarû ° nâpatiḥ duhi° B °nâpatiduhi ° ttâ nama°. — 17. BC °syamânâ añjali(C ° li)ya bo° B °tvaṁ mucitvaṁ açru ime vâca bhâshe | C °muñcita açru ime ca bhâshe | . — 18. C °lâbhâ mahipati° BC °ti biṁbisâ° C °pto ti pari° BC °hitâsyâ | âjñâ ya(C °âcchodya)syâ°.

यस्यायं विजिते स्थितो बोधिसत्वो अद्य अतुल्यां प्राप्स्यति बोधिमद्यां ॥
भुंजित्वा भक्तं मम क्रकुच्छन्दो व्रजेत्स्वयंभू द्रुमं पादपेन्द्रं ।
प्रभासयन्तो दश दिशा समन्ता जाम्बुनदस्य यथ सुवर्णयूपो ॥
कोनाकनामो महदक्षिणीयः भुंजित्व भक्तं व्रजि बोधिमण्डं ।
अदीनचित्तो अचलो असंप्रवेधि यस्यासि कायो स्फुटो लक्षणेहि ॥
यस्यासि नामं तद काश्यपो पि जाम्बूनदसमनिभविग्रहस्य ।
भुंजित्व भक्तं मम विदु सत्वसारः व्रजेत्स्वयंभू द्रुमवरं पादपेन्द्रं ॥
ये भद्रकल्पे अतुलिय दक्षिणेया भेष्यन्ति धीरा हतरजनिष्किलेशा ।
पूजेष्यि सर्वा अतुलियबोधिहेतोः न मह्य कांक्षा अन्या हि अस्ति किंचित् ॥
ये अन्तरीक्षे इह देवपुत्राः ते चन्द्रनेनोकिरे बोधिसत्वं ।
वाचां भाषे मुदितवेगजाता सेनापतेर्दुहिता लब्धलाभा ॥
पूर्वेनिवासं स्मरेसि सुजाता प्रेम्नं जनेत्व शुभं बोधिसत्वे ।
बुद्धान कोटिनयुता सहस्रा भुक्त्वा भक्तं मम गता बोधिमूलं ॥

अथ खलु बोधिसत्वो येन नैरंजना तेनोपसंक्रमित्वा मुहूर्तं अस्थासि । समेहि पादतलेहि धरणीं प्रकम्पेसि ॥ अथ खलु तस्मिं समये महान्तः पृथिवीचालो अभूषि भीषणो सरोमहर्षणो येन पृथिवीचालेन द्र[203b]यं त्रिसाहस्रमहासाहस्रा लोकधातु समा अभूषि पाणितलजाता सुमेरुश्च पर्वतराजा चक्रवाडमहाचक्रवाडा च पर्वता निमिन्धरो युगन्धरो ईषांधरो च पर्वता खदिरकाश्वकर्णो विनतको सुदर्शनो च सप्त पर्वता द्वीपान्तरिका तथान्ये कालपर्वता पृथिव्यां ओसन्ना अभूषि

1. BC °jita sthi° C °tvo adyâtulâm prâ° BC °psyasi bo° B °m agrâ | . — 2. C °cchandaḥ vra° BC °jeta svayam° B °yambhu dru° C °drumapâ° C °pendra. — 3. BC prâbhâ° C °diço sa° B °mantâ jambu° BC °sya yathâ su° C °rṇṇarûpo ko° B °rṇṇapûryo ko°. — 4. C °ṇiyo | bhum° B °vrajito bo° C °vrajito maṇḍam | . — 5. B °tto abalo asam° C °tto abaro âsam° BC °sphuṭalaksha° B °ṇehi yasyâ°.

6. C yasyâpi nâ° B °po pi jâmbunadasya samani° C °jâmbunadasya samanim suvigra°. — 7. C °tvasâram vra ° yambhuḥ dru° B °yambhu dru° B °varapâ° C °varapapendram | . 8. B °janishkileçâ | . — 9. C pûjeshi sarvâ° C °heṭoḥ | na ma ° kshâ anupami asti° B °kshâ anuyami asti°. — 10. B °te candeyenokire bodhisatvâm vâ° C °kila bodhisatvâ vâ°.

11. BC vâcâm ca bhâ° B °pate..hita la° C °pate ohita°. — 12. C °nivâsa sma° BC °janetvâ çubhe bodhisatvâ(C °tvâḥ) bu°. — 13. B °koṭinayu ° hasrâm shashṭhim bhutvâ bha° C °hasrâm shashṭhi bhumjitva bha°. — 14[1]. C °janâs teno° BC °hûrtta a°. — 14[2]. C °prakampesi ‖ . — 15. C °mahânto pri° BC °bhûshi | bhi° B °romaharshi(?)nâ yena° C °lena | ayam tri° BC °trisâha ° hasro loka° B °dhâtû samâ abhûshi | pâ° C °dhâtuḥ çatakacakra° (301, 3) B °nimiṇḍhara yugandhara iyaṃdharâ ca dirako çvakarṇṇâ ninatako diçavidiça nabhâ tathâ parvatâ çîtântarikâ tathânye ° satvâsyânubhâvena mahâ°.

बोधिसत्वस्यानुभावेन । महासमुद्राश्च संक्षुब्धा अभूषि बोधिसत्वस्यानुभावेन प्रज्ञायेन्सुः ॥ तेन खलु पुनः समयेन अयं त्रिसाहस्रमहासाहस्रो लोकधातुः शकटचक्रप्रमाणमात्रेहि जाम्बूनदस्य सुवर्णस्य पदुमेहि शतसहस्रपदुमेहि शतसहस्रपत्रेहि नीलवैडूर्यजातेहि मुसारगल्वकेहि शिरिगर्भपिंजलेहि स्फुटा अभूषि अष्टापदविनिबद्धा महान्तश्च ओभासो प्रादुर्भूतः येन ओभासेन महानिरया भीष्मा उपशान्ता अभूषि । सर्वे नैरयिका सत्वा सुखिता अभूषि । सर्वे तिर्यग्योनिगताः सुखिता अभूषि । सर्वे यामलौकिका सत्वाः सुखिता अभूषि परस्परं मैत्रचित्ता बोधिसत्वानुभावेन । महान्तेन चोभासेन सर्वा त्रिसाहस्रमहासाहस्रा लोकधातु ओभासिता अभूषि ॥ तेन खलु पुनः समयेन त्रिसाहस्रमहासाहस्रायें लोकधातुये यावतका देवेन्द्रभवना नागेन्द्रभवना यक्षेन्द्रभवना गरुडेन्द्रभवना ते सर्वे एकोभासआभासा अभूषि ॥ सर्वच बोधिसत्वस्य आत्मभावतामनुप्राप्तां संजानन्ति ॥ तेन खलु पुनः समयेन यावतका त्रिसाहस्रमहासाहस्रायें लोकधातूये देवा नागा यक्षा गन्धर्वा असुरा गरुडा किन्नरा महोरगा ते सर्वे स्वकस्वकेषु आसनेषु न रमेन्सुः बोधिसत्वस्यानुभावेन । बोधिसत्वस्य शिरिं असहन्ता ते सर्वे येन बोधिमण्डस्तेनोपसंक्रमेन्सुः पुष्पमाल्यगन्धच्छत्रपताकावाद्यधूपनविलेपनपरिगृहीता ॥ तेन खलु पुनः समयेन असंख्येयेहि अप्रमेयेहि बुद्धक्षेत्रेहि अभिक्रान्तकान्ता बोधिसत्वाः देवतावेषमभिनिर्मिणित्वा उपरि अन्तरीक्षे प्रतिष्ठेन्सुः दिव्यउत्पलपदुमपुण्डरीकपरिगृहीता ॥ तेन खलु पुनः समयेन अयं त्रिसाहस्रमहासाहस्रो लोकधातुः शक-

1. B °shi | bo° na prajñayetsuḥ | . — 2. B °punas samaye° dhâtûḥ çakaṭa° C °tuḥ çatakacakra ° rṇṇasya padumehi sahasrehi nilavai° B °rṇṇasya padu ° jâtehi susâlagalva° C °musâgalvakeçerehi çiri° BC °sphuṭo abhû° B °shi | ashṭâ° C °ddhâ mahâmtaçca° BC °çca obhâsa prâ° C °rbhûto | ye ° yâ mahâbhî°.

6[1]. C °nairakâyikâ satvâḥ su°. — 7. BC °bhûshi | para° C °dhisatvasyanu° BC °vena mahâ°. — 8. C °ntenâvabhâse° B °ntenâcabhâse° BC °hâsâhasro lo°. — 9. B °hâsâhasro ye lo° C °hâsâhasro lokadhâtûye yâvattakâ devendrabhavano nâgendrabhavano yakshe° C °kobhâsâ âbhâsâ° B °kobhâsâabhâ°.

11. BC °bhâvanâm anuprâptam sam°. — 12. C °punas samayena yâvattakâ tri° B °hâsâhasro ye lo° C °kshâ râkshasâ gandha ° metsuḥ | bo° B °metsuḥ bo° BC °vena bo°. — 14. BC °çiri asa° C °hanto | te sarve ye ° dhimaṇes teno° B °dhimaṇdes tenopasamkrammetsuḥ pu°. — 15. C °punaḥ asamkhyehi apra° BC °pramehi bu° B °kshetre abhi° BC °bhikrântehi krânta bo° B °dhisatvaḥ de° C °dhisatvo de° B °uparî anta ° shṭhetsuḥ di° C °shṭhetsu ‖ di ° hîto divyacandanacûrṇṇaparigṛihîtâ | B °hîto ‖ .

18. C °trisâhasramahâ° BC °krapramânehi jâ° B ° jâmbunada° C °nîravaiḍûryyânâdehi ayu° B °ryanâdehi | ayu° BC °yutâsma(C °sya ?) keçarehi çirinigarbha(B °rbbhe)bhumjehi bhûmitalam upâdâya(C °ya |) yâvadbhavâgram sphuṭam a(B ° ṭam a)bhûshi | âgantukehi keçalake(C ° çale)hi çiri(B ° risha)garbhapamjarehi bhûmitalam upâdâya

[204a]टचक्रप्रमाणेहि जाम्बूनदसुवर्णपदुमेहि शतसहस्रेहि नीलवैडूर्यनाडीहि अ-
युतशो केशरेहि [शिरीषगर्भपंजरेहि भूमितलमुपादाय यावज्जवाग्रं स्फुटमभूषि
आगन्तुकेहि केशरकेहि] शिरीषगर्भपंजरेहि भूमितलमुपादाय यावज्जवाग्रं स्फुटं
अभूषि आगन्तुकेहि बोधिसत्वेहि देवनागयक्षेहि च असुरगरुडकिन्नरमहोरगे-
हि च ॥

अथ खलु बोधिसत्वो महतो देवगणस्य पुरतो नैरंजनां नदीं उत्तीर्णो ॥ तेन खलु पुनः समयेन नैरंजनाये नदीये अशीति च्छचकोटीयो जाम्बूनदसुवर्णानां छत्राणां प्रादुर्भूता बोधिसत्वस्य उपरि स्थिहेन्सुः अशीति च्छचकोटीयो रूप्यमयानां अशीति च्छचकोटीयो अक्षगर्भमयानां अशीति च्छचकोटीयो हस्तिगर्भमयानां अशीति च्छचकोटीयो लोहितकामयानां अशीति च्छचकोटीयो मणिमयानां प्रादुर्भूता बोधिसत्वस्य उपरि स्थिहेन्सुः । अशीति च नागकोटीयो एकमेकस्य नागो अशीतिनागकोटिपरिवारो लोहितमुक्तापुष्पपरिगृहीता येन बोधिसत्वस्तेनोपसंक्रमित्वा बोधिसत्वं पूजयेन्सुः पुरिमकेन पुण्योपचयेन ॥

अथ खलु कालो नागराजा स्वजनपरिवारः स्वकातो भवनातो अभ्युद्गमित्वा येन बोधिसत्वस्तेनोपसंक्रमित्वा बोधिसत्वस्य पादां शिरसा वन्दित्वा बोधिसत्वं प्रांजलीकृतो प्रेक्षमाणो गाथाभिरध्यभाषे ॥

बोधिं पर्येषमाणो यं बोधिसत्वो विसारदो ।
नैरंजनां चरित्वान बोधिमूलमुपागमे ॥
नानाद्विजसंघरुतं वरपादपमण्डितं ।
वरपुष्पफलोपेतं त्रिसाहस्राय यावता ॥
यच्च ते लोकप्रद्योता आगता बोधि प्रापुणे ।
क्रकुच्छन्दो कोनाकमुनि काश्यपो च महामुनि ॥

yâvadbhavâgraṁ sphuṭaṁ a(C ° ṭam a)bhûshi(C °shî |) âgantukehi bo° C °nnarehi maho°.

6¹. C °raṁjanâ nadîm uttirṇṇo | . — 6². BC °koṭiye jaṁbûnadasuvarṇṇaṁ(C °rṇṇa) cchatrâ ° satvasya upa(C ° pari)sthihetsuḥ(C °tsuḥ |)açi° B ° açîtiṁ cchatrakoṭiyo hasti° B °açîtiṁ cchatrakoṭiyo lohita ° çîtiṁ cchatrakoṭiyo maṇi° C °rbhûto | bo ° hetsuḥ | B °hetsuḥ açi°.

11. B açîtiṁ ca nâ° C açîti nâga ° shpagṛihîtâ yena° B °shpagṛihitâ yena° C °jayetsuḥ | pûrima° B °jayetsuḥ puri°. — 14. C °nâto atyudga ° rasâṁ vandi ° jalikṛito pre ° bhir abhâshe ‖ B °thâbhi adhya°.

17. C bodhi paryye ° tvo viçârado. — 19. BC °gharute varapâdamaṇḍite | . — 20. B °pete tri ° yâ yâvata | C °yâvad yatra°.

21. C yatra ta lo°. — 22. C krakutsaṁdo nokamuni ° hâmuniḥ | B °hâmuniṁ taṁ de°.

तं देशं लोकप्रद्योतो उपागमे लोकनायको ।
यो सो वादित्यबन्धूनां शाक्यानां परमो मुनिः ॥
ते देवसंघा मुदिता सर्वे हर्षितमानसाः ।
पुष्पमेघसमानोघां तामकासि वसुन्धरां ॥
स्वभवनेषु आगत्वा पूजेन्ति लोकनायकं ।
प्रदक्षिणं बोधिसत्वं शुद्धावासा समागता ॥
मन्दारवेहि पुष्पेहि दिव्येहि मनुजेहि च ।
महारहेहि श्रेष्ठेहि बोधिमण्डं अलंकरे ॥
वृत्वा ततोमुखा सर्वे बोधिम[204b]ण्डे वने नमे ।
येन स प्रवरो देशः पूर्वबुद्धनिषेवितः ॥
यापि च बोधिमण्डस्मिं देवता वृक्षमाश्रिता ।
सा बोधिसत्वं दृष्ट्वान घोषेसि च अमानुषं ॥
चैलं च श्यामये दिव्यं चन्दनं च प्रमुंचसि ।
सा दिव्यै रत्नचूर्णैश्च ओकिरेसि नरर्षभं ॥
नानाविधानां गन्धानां दिव्यानां मानुषाण च ।
चतुर्दिशाश्रिता वाता बोधिमण्डे प्रवायेन्सु च ॥
दिव्या च तूर्या वाद्येन्सु अन्तरीक्षस्मिं शोभना ।
संगीतिं विविधां कुर्वन् मञ्जुघोषां मनोरमां ॥
ओभासः सुमहा आसि बोधिमण्डस्य रश्मिभिः ।
येन सर्वो देवलोको स्फुटो आसि तदनन्तरं ॥

1. B °dyotoḥ u° C °nâyaka | . — 2. C °bandhunâṁ çâ° B °ndhûnâ çâ° C °muni | . — 3. C °mânasâ | . — 4. B °meghâ samâṁ oghâ tavâ kâçi vasuṁdharâṁ | C °meghâṁ samânoghâtamâkâçi vasuṁdharâṁ | . — 5. B vâshâvaneshu âga° C teshâṁ vaneshu âgatvâ yujyenti lokanâyakaḥ | .

6. C °gato ‖ . — 7. C mandara°. — 8. C mahâravehi çre° BC °çreshṭehi bodhi° C °laṁkṛitaṁ | . — 9. B °dhîmaṁṇḍe vane°. — 10. C °pravarâ de ° buddhevite | B °buddhinishe°.

11. C pâpi ca bo° BC °dhimaṇḍesmiṁ° C °ksham açritâ | B °çritâḥ | . — 12. C so bo ° shtvânomeghotsu ca amâ° B °shetsu ca amâ°. — 13. B vailaṁ tatrâmashe di° C vairaṁ ca bhrâ° B °ndananda pramuṁcahi | C °muṁcasâ | . — 14. C so divyaiḥ ratnacurṇṇena okiresâ nararshabha | B °kireçâ nararshabhaḥ nânâvi°. — 15. B °vyânâṁ ca mânushâṁ | C °nushâni ca | .

16. C °pravârayetsuḥ | B °yetsu ca | . — 17. B °dyetsu antarikshesmiṁ ca ço° C °dyensuḥ | antarîkshesmiṁ°. — 18. BC °mañjûgho°. — 19. B obhâstṛiḥ (?) su° C °sumano âsi maṇḍâna raçmibhi | B °ṇdânâṁ ca rasmibhiḥ yena°. — 20. BC yena ca devaloke sphu° C °âsî tadanantara B °ntare | .

जिह्मवर्णा अभूद्दिव्या विमाना रतनामया ।
जाम्बूनदसुवर्णेहि बोधिसत्वस्य रश्मिभिः ॥
मन्दारवेहि पुष्पेहि ओकिरेन्ति नभे स्थिताः ।
देवपुत्रसहस्राणि बोधिसत्वं महर्द्धिकाः ॥
श्रुणित्वा अतुलं घोषं कालो नागो महर्षिणः ।
हर्षितप्रीतसंतुष्टो नागकन्यापुरस्कृतो ॥
क्रीडारतिसुखं दिव्यमुज्झित्वा सर्वमागतो ।
चतुर्दिशं विलोकेत्वा पश्यते पुरुषर्षभं ॥
वैरोचनं वा गगणस्थिं सर्वरश्मिसमागतं ।
अर्चित्वा मुदिततुष्टो बोधिसत्वं समालपे ॥
यादृशा लक्षणा पूर्वबुद्धान पुरुषोत्तम ।
क्रकुच्छन्दे कोनाकमुनि अभूत्तापि नरोत्तमे ।
काश्यपे जिने च लक्षणा तथागते पुरुषोत्तमे ॥
समा जालावनद्धा तेषां चरणा सुप्रतिष्ठिता ।
लाक्षारसप्रसेकवर्णा सहचक्रा महर्षिणां ।
हेष्टा पादतला जाता स्वस्तिकैरुपशोभिताः ॥
पादांगुलीषु सर्वत्र नन्द्यावर्त उद्गता ।
भासन्ति लोकनाथानां व्रजतां चित्रमेदिनीं ॥
उच्छृंखलपादा ते नाथ ईदृशा यादृशो तुवं ।
नउज्जोतना गुल्फायो अंगुलीयो सुघट्टिता ॥

1. BC jihmabalâ abhû° B °vimâna ra° C °vimânâ catanâmayâ | . — 2. C jaṁbunada° B jaṁbûnadasuvarṇṇahi bo° C °çmibhi | . — 3. C °sthitâ | . — 4. C °trasahasrehi bo° BC °dhisatva maha° B °rddhikâḥ çru°. — 5. C °shaṁ nâlo nâgo maharddhiko | .

6. BC °prîṇitaṁ tu° C °gakaṁnyâ°. — 7. B °divyem ujhi° C °gatâḥ | B °gatâ | . — 8. C °lokyatvâ pacyaṁte puru°. — 9. C °vâ gaganesmiṁ saraçmiṁ ca samâ° B °smiṁ saraçmim âgataṁ | . — 10. BC °ditas tushṭho(C °shṭâ) bo° C °satvâmâraye | B °mâlaye | .

11. B °pûrvebuddhâ° ttame | C °ttamo | . — 12. BC °cchando ko° B °bhûcca naro° C °ttamâḥ | . — 13. B kâçyapo jine° C °çyapa jino ca la° gata pu° ttamaḥ | . — 14. C saṁmâlâvana° BC °ddhâ caraṇâ teshâṁ° B °shâṁ prâvaraṇâ | so pratishṭhitâ lâ° C °shâṁ pracâreṇa saṁpratishṭhita | . — 15. C °rṇṇâ mahârâsenikâ prasekavarṇṇâ paracakra maharshiṇâḥ ‖ B °rṇṇâ saha | râsenikâ paracakrâ maharshiṇâ | .

16. BC °datare jâ° B °bhitâḥ pâ°. — 17. B °nandi âvarddha uddhatâ | C °ndiâvartta urddhatâ | . — 19. B ucchraṁsvapâdâ° C °pâdânte nâtha° BC °tha idṛiçâ ° ço bhuvaṁ | . — 20. BC na ujjatana gu° B °gushphâyo aṁguliyo aghaṭṭiyo | C °gushphâyâṁ tathâ loke hito bhave | .

दीर्घांगुली ताम्रनखा जालेहि उत्सदेहि च ।
चरणा लोकनाथानां व्रजतां चित्रमेदिनीं ॥
एणीजंघा च ते आसि शिरिगर्भोपसन्निभा ।
जानुका गुप्तगुल्फा च तथा लोकहिता भवे ॥
गजहस्तसदृशा बाऊ आसि तेषां महर्षिणां ।
सिंहपूर्वार्धकाया च न्यग्रोधपरिमण्डला ॥
हातकं यथा उत्तप्तं कांचनच्छविशोभना ।
अनोनतेन कायेन पाणीहि जानुकां स्पृशे ॥
मृगराज्ञो हि यथा तेषां कटी वट्टा सुसंश्रिता ।
कोशवस्तिगुह्य[205a]मेढ्रं हयराजस्य यादृशं ॥
ओदातमाचारं तेषां जानूनि च सुनिष्ठिता ।
गम्भीरनाभा ते आसि पूर्वबुद्धा महर्षिणो ॥
रजोकणेन (?) अस्पृष्टो कायो तेषां महर्षिणां ।
मृदुलक्षणच्छवी च ते नाथा ईदृशा यादृशो भवां ॥
एकैकरोमा ते आसि ऊर्ध्वाग्ररोमराजिनो ।
नीलप्रदक्षिणावर्ता तथा लोकहितो भवां ॥
संवृत्तस्कन्धा भूश्चैषां यथा ऋषभस्य तादृशी ।
प्रगृह्यगाचा ते नाथा आसीसु इमे उत्सदा ॥
फणिकोपमांसबाहा अनुपूर्वमनुद्गता ।
नारायणसंघटना ईदृशा यादृशो भवां ॥

2. B °lokanânâthâ° BC °nâṁ âya(C ° pa)ta citra° C °dini | . — 3. C °âsi giriçigarbho° B °âsi girigarbho° BC °pasaṁnibhâ | . — 4. BC jânukaṁ gupta°. — 5. BC gajanâgasadṛi° C °âsit teshâṁ° B °rshiṇaḥ siṁ° C °nâṁ | ano° (l. 8; C *range ces vers dans l'ordre suivant* : 5, 8-12, 6, 7, 13, etc.).

6. B °pûrvarddhikâyâ° C °pûrvâ murddhnikâyâ ca nyegro°. — 7. C hâthakaṁ° BC °ttapta kâṁ° C °çobhanâḥ | rajo°. — 8. BC anonamattâna kâye° C °pânthi janukâ spriçet | . — 9. BC °râjñâ(C °jñâṁ) himavâṁ teshâṁ kaṭi(C °ṭi) vatte(C °rtte) sumanvitâ (C °tâḥ) | . — 10. B koçâva° C °stigumedraṁ ha° B °medhraṁ (?) ha°.

11. BC odâtam akâlaṁ te(C °lan te)shâṁ janena ca su° C °nisthitaṁ | B °shṭhitaṁ | . — 12. C °nâbhi te â ° harddhino siṁha° B °hashino | . — 13. BC rajogatena asprishṭâ kâyo° C °rshiṇâ | . — 14. C °cchaviṁ ca te nâthâ idṛiçâ° BC °çâ sâdriço°. — 15. C °roman te âsi uddhâgra° B °ûrddhâgra°.

16. C nîlâ pra° B °hitâ bha°. — 17. C °ttaskaṁdhâ bhût teshâṁ ṛisha° B °ndhâ bhûçcaishâṁ ṛi ° sya yâdṛiçi | C °sya yâdṛiçi tathâ pra°. — 18. B °hvarju(?)gâ° C °nâtha âsitsu imotsadâ | B °dâ pha°. — 19. B phaliko ° savâhâ° C °savâho anu ° ddhatâḥ. — 20. B °ghatanâ° C °nâ idṛiçâ yâdṛiçâ bha° B °yâdṛiçe bhavâṁ | .

IMPRIMERIE NATIONALE

तुंगनखा ताम्रनखाः कैलासशिखरोपमाः ।
लक्षणैरुत्सदैश्चैषां कायमतीव शोभितं ॥
ग्रीवा कम्बुसमा तेषां अनुपूर्वसमुन्नता ।
सिंहहनू च ते नाथा तथा रसरसाग्रिणः ॥
चत्वारिंशत्सुवट्टा दन्ता तेषां महर्षिणामभूत् ।
अभून्सु शुक्लदंष्ट्रा ते ईदृशा यादृशो भवां ॥
प्रभूततनुजिह्वाय सर्वं छादेन्सु स्वं मुखं ।
द्वे च कर्णाग्राणि ते नासां च परिमार्जिषुः ॥
अष्टांगसंप्रपूर्णा च वाचा तेषां महर्षिणां ।
सर्वदर्शिणां सत्वा च आज्ञेया सर्वप्राणिनां ॥
ब्रह्मस्वरा च ते आसि करविंकरुतस्वरा ।
दुन्दुभिस्वरघोषा च प्रेमणीयस्वरा पि च ॥
जलेरुहो व कनको दशशतरश्मि भासति ।
तथा भासेन्सु नाथानां मुखा आदित्यबन्धुनां ॥
आयता अभिनीला च नेत्रा तेषां महर्षिणां ।
नासा च उन्नता शोभे सुवर्णयूपोपमा यथा ॥
भुवन्तरेणाभूत्तेषां वरजातिमहर्षिणां ।
ऊर्णा हि प्रकाशवन्ती मृदुका तूलसादृशा ॥
महानलं चाभू मुखं चन्द्रो वा पूर्णमासिये ।

1. C °mranakhâ kai° B °kailâçaçi°. — 2. C °kâyaṁ ati°. — 3. B grivâ kaṁrutsamâ° C °vâ kaṁbusamâ te ° rvasamâgatâṁ | B °rvasamuṁgatâ | . — 4. C sihanu ca te nâ° B siṁhabanu ca te nâ ° thâ rasarasaçriṇaḥ | C °sâçritâ | . — 5. C °riṁça suvaṭâ da° B °vaṭâ da ° rshiṇâ | C °rshiṇâm abhût | .

6. C suçukladantâ te nâthâ idriçâ° B °kradashṭrâ te î ° driçâ bha° C °yâdriçâ bhavân | . — 7. B °bhûtatanûji° BC °hvâ ca sarvaṁ(B °rva) cchâdetsu saṁmukhaṁ | . — 8. C duve ca sakalâgrâmi nâço ca parimârjetsuḥ | B duve ca kalâgrâṇi nânâçâ ca parimâjetsuḥ a°. — 9. BC °prapûṇṇâ(B °putvâ) ca vâ° B °hashinâṁ | C °rshiṇâ | . — 10. BC °darçi satyâ (B °tyo) ca â° C °âjñâyâ sarvaprâṇivâṁ | .

11. C brahmarâ ca te â°. — 12. B indubhi° C indubhiṁsva ° svarâṇi ca | . — 13. C jaleluhako janaka da° B °ruhako kanaka da° BC °raçmiva bhâ° B °bhâsayati | . — 14. BC °bhâsetsu nâ° C °tyabaṁdhunâṁ.

16. BC nâçâ ca u° B °rṇṇayûshopamo yathâ | C °yûthâpamadyathâ | . — 17. BC purushânta° B °retâ bhû ° shâṁ balo jâti° C °shâṁ ca râjâti°. — 18. B durṇṇâ hi° C urṇṇâ hi° BC °prakâçâ ca vâtâ mṛi° C °dukatû° BC °lasadriçâ | . — 19. BC mahânilâ ca. . u(C °ca bhrû) mukhâṁ candro°.

रतनाग्नीव च दिशा सर्वा ताय प्रभासिषु ॥
नीला च मृदुका केशा काचिलिन्दिकसादृशा ।
सर्वे प्रदक्षिणावर्ता तथा लोकहितो भवां ॥
उष्णीषशीर्षा ते नाथा ईदृशा यादृशो भवां ।
अनुल्लोकितमूर्ध्नानि सुरेहि असुरेहि च ॥
महाप्रभा हि ते बुद्धा अतिगृह्णन्ति रश्मिभिः ।
केतुराजेन चन्द्रो व प्रभाय अतिगृह्यते ॥
एतां च अन्या च पश्चित्वा निमित्ता लक्षणानि च ।
सर्वाणि बोधिसत्वस्य इदं वचनमब्रवीत् ॥
यथा ते देवपुत्रा ते पूजनार्थाय उत्सृताः ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
अजितां जालिनीं तृष्णां भवनेत्रीं समाहितः [205b] ।
प्रज्ञाशस्त्रं गृहीत्वान छेत्स्यसे मारबन्धनं ॥
अद्य त्वं सर्वतो शैषं क्लेशपरिवेष्टितं ।
विधुनिष्यसि रागाग्निं बोधिं प्राप्तो नरोत्तम ॥
संघाटीपटं पात्रं च चीवरस्य वर्णता तथा ।
यथा मे दृष्टा नाथानां तथा च लोकहिता तव ॥
सर्वे प्रदक्षिणावर्ता एदृशा भोन्ति पुन्नला ।
यथा व्रजसि सिंहो व अद्य बुद्धो भविष्यसि ॥
शैलोपमं अप्रकम्प्यं समाधिं च जिनोपमं ।

1. C ratnâ agni ca (*ou* °va) odi° B °gniva odi ° rvâ tâṁ ca pra° C °rvâ tâṁ prabhâsishu diçâ ‖ . — 2. C °çâ kâlindi°. — 3. BC °hitâ bhavet | . — 4. C ûshṇîrshe te ya° B °çirshe te ya ° çâ yâdriçâ hhavet | C °yâdriçâ bhavân anavaloki°. — 5. B anuloki° C °murddhi surehi a°.

6. C °bhâ te buddhâç ca a° BC °abhigṛihna°. — 7. B °ndro pra° C °ndro ca a ° prabhoyaṁ° BC °yaṁ abhigṛihnishu | . — 8. C etâm anyâç ca paçyi° B °paççitvâ ni° C °nirmitâ laṁbanâni ca | B °ttâ nâlaṁbanâni ca | . — 9. C sarvâdhibodhi°. — 10. B yadâ ca te de° C yadâ ca devaputro pû° B °janâthâya utsakâḥ | C °utsargâḥ.

11. C °viro a°. — 12. C °triṁ so yaṁ prabhâṁ | . — 13. BC °gṛihîtvâ ca cche° C °tsyasa mâ°. — 15. B vidhûni° C °dhuniḥshyasi° BC °si rogâgniṁ° C °bodhiprâpte narottame | B °ttamaṁ | .

16. B °ṭipaṭapatraṁ° C °ṭipatrapâtraṁ° BC °rṇṇano yathâ | . — 17. C evaṁ me dṛi° BC °drishṭvâ nâ° C °tathâ nâṁ tathâ lohita varṇṇatâ | B °lohitâ tava | . — 18. C sarvapra ° nti puṁgalâ | B °nti puṅga(*ou* °dga)lo | . — 19. C °vrajesi siṁ° BC °ho ca adya°. — 20. B çailopiyaṁ aprakaṁpiyaṁ sa° C °prakraṁpiyaṁ sâ°.

बोधिमण्डे स्थिहित्वान दृढवीर्यः समारभे ॥
स तस्य वचनं श्रुत्वा कालनागस्य भाषितं ।
तुष्टो उदग्रसुमनो बोधिमूलमुपागमे ॥

श्रुत्वान अतुलं घोषं कालनागो महाबलो ।
बोधिसत्वस्य वेगेन भवनातो समुन्नतो ॥
अंजलीं प्रगृहीत्वान दशपूर्णागुलीन्तथा ।
अभिस्तवे बुद्धवीरं बोधिमण्डं व्रजन्तकं ॥
यथा मृदु इमे वाता वायिष्यन्ति सुखं सदा ।
सुरभिमनोज्ञगन्धा नात्युष्णा नातिशीतलाः ॥
यथा च कुसुमवृष्टिं प्रवर्षेन्सु इमं देवता ।
सुगत तव रहत्वं भेष्यति द्विपदोत्तम ॥
प्रदक्षिणावर्तो मार्ष तुष्टो हृष्टो प्रमोदितो ।
प्रीतिमना उदग्रो च सुखंमुञ्चो पि निष्क्रम ॥
यथापि तूर्यसहस्रं संप्रघुष्टं उपरि नभस्मि स्फुटं देवताहि ।
हृष्टप्रमुदितचित्तवेगजातो भविष्यसि बुद्धो विशिष्टो सर्वलोके ॥
यथा च प्रभा न भायि अन्य काचिदुपरिविमाना कृता च जिह्मवर्णाः ।
यथा प्रचलते भूमि षड्विकारं भविष्यसि अद्य अतुल्यो दक्षिणेयो ॥
यथ च श्यामयन्त्यंबराणि भीष्मं मारगणं भंजित्व हृष्टचित्ता ।
छत्रध्वजपताका च धारयन्ति भविष्यसि बुद्धो न मह्य अस्ति कांक्षा ॥

1. C °vîryya sa° B °bhavet | . — 2. C °tasya nacanaṁ çrutvâ kâlo nâmasya bhâ°. — 4. BC °balaṁ | .

6. B aṁjelīṁ pra° gulî ta°. — 7. BC °ntakâ | . — 8. BC yathâ pṛithu ime vâtâ° C °tâ vâcishyanti ime yathâ | . — 9. B °nogandhânâṁ tûshṇî nâti° C °ndhânâṁ tûshṇî nâhiti çitalâ | . — 10. BC °rshetsu i° B °iva de° C °vatâṁ | .

11. B sugatavaro rahatvaṁ bheshyasi dvi° C sugatavarâhaṁ bheshyâmi bhavanti dvi° BC °ttamaṁ | . — 12. B °kshiṇamâsha tushṭo pramuditâ ca prî° C °kshiṇaṁ mârsha tushṭâ pramuditâ. — 13. B °manâ | u° C °manâ pi ca | u° BC °dagrâ ca su° C °khaṁ muṁcâmi nikriye B °khaṁ muṁcâpi kirkiye tûrya°. — 14. C tûrya ° sraṁ praghu° B °sraṁ | sapra° BC °nabhaṁ sphu ° vatehi | . — 15. BC °gajâtâ bhavishyasi ‖ (C °shyati |) saṁbu ° loke yathâ°.

16. B °prabhâ na hâyi | anya° BC °jihmabalâḥ | . — 17. BC °pracarate bhû° C °shyati | adya atulâṁ dakshiṇiyo B °shyasi | adya atulye dakshiṇeyo ya°. — 18. BC yathâ ca bhrâ° BC °bhishmâṁ mâraganasaṁghaṁ bhaṁ(C °bha)ji ° ttâ ccha°. — 19. B cchatraṁdhva° BC °tâkâ dhâ° C °yanti | buddho mama asti° B °shyasi | bu°.

यथा च मधुरं दुन्दुभी नदन्ति गगनतलं स्फुटं सर्वमम्बरेहि ।
यथा च कुसुमा वर्षे देवसंघो भविष्यसि लोके सदेवके स्वयंभूः ॥
यथा च करिय अंजलिं नभस्मिं अभिस्तवे देवसहस्र हृष्टचित्ता ।
कनकप्रभो विशिष्टो दक्षिणेयो भविष्यसि बुद्धो नराण अग्रवादी ॥

अथ खलु बोधिसत्वो येन वृक्षमूलं तेनोपसंक्रमित्वा तेन खलु पुनः समयेन सर्वावन्तो बोधिमण्डो ओसक्तपट्टदामकलापो अभूषि । उच्छ्रितध्वजपताको छत्रकोटिसमलंकृतो रत्नसूत्रविचितो धूपितधूपनो रतनवृक्ष[206a]परिवृतो चीवरसंस्तृतसंस्तृतो चन्दनचूर्णअध्योकीर्णो रत्नोघविचितो ॥ तेन खलु पुनः समयेन अनेकानि देवशतसहस्राणि उपरि अन्तरीक्षे प्रतिष्ठिहित्वा धूपनपरिगृहीता बोधिसत्वं नमस्यन्ति । छत्रध्वजपताकपरिगृहीता बोधिसत्वं नमस्यन्ति । दिव्यउत्पलपदुमकुमुदपुण्डरीकपरिगृहीता नमस्यन्ति बोधिसत्वं । दिव्यचन्दनचूर्णपरिगृहीता बोधिसत्वं नमस्यन्ति । दिव्यरत्नचूर्णपरिगृहीता दिव्यरत्नपुष्पपरिगृहीता अनिमिषं प्रेक्षमाणा बोधिसत्वं नमस्यन्ति ॥ तस्य अन्या देवता सुवर्णमयं बोधिवृक्षं संजानन्ति । यथा स्वकाये अधिमुक्तीये अन्ये देवा रूप्यमयं बोधिवृक्षं संजानन्ति । अन्ये देवा वैडूर्यमयं बोधिवृक्षं संजानन्ति । अन्ये देवा स्फटिकमयं बोधिवृक्षं संजानन्ति । अन्ये देवा अक्षगर्भमयं बोधिवृक्षं संजानन्ति । अन्ये देवा सप्तरत्नमयं बोधिवृक्षं संजानन्ति । अन्ये देवा शतसहस्ररत्नमयं बोधिवृक्षं संजानन्ति । यथापीदं स्वकस्वकाये अधिमुक्तीये अन्ये देवा लोहितचन्दनस्य बोधिवृक्षं संजानन्ति । अन्ये देवा अगुरुचन्दनस्य बोधिवृक्षं संजानन्ति । अन्ये देवा

1. C °dhura dundubhi nadanti gaganata° BC °tala sphu° C °sphuṭa sarvehi amba° B °sarvaṁ amba°. — 2. BC °suma varshe(C °rsha) de° B °si | lo ° ke svayambhûḥ ya°. — 3. C °riyaṁ aṁja ° smiṁ asti tad eva saha°. — 4. BC kanakanibhaṁ viçishṭaṁ dakshiṇeyaṁ bha° B °si | bu° C °râṇâṁ a°. — 5. C °naḥ samayana sarvâvanto bodhimaṇḍe oçakta°.

6. B °patâkâcchatrako sama° C °cchatrakoṭisama ° travicitro dhûpi ° panaṁ ratnavṛiksha° rasaṁstṛito saṁstṛitaḥ canda° BC °tnogho vicitro | . — 8. C °gṛihîtvâ bo° B °gṛihîto bodhi°. — 10¹. BC °patâkâ pari°. — 10². BC °vya utparapadu° C °hîtâ bodhisatva namasyanti | .

11. BC divyaṁ canda ° nti di°. — 12. BC divyaṁ ratna° C °cûrṇṇaṁparigṛihîtâ bodhisatva namasyanti | divyaratnacûrṇṇaparigṛihîtâ ani ° kshamâṇi bo° B °kshamâṇi bo°. — 13. B °anyade° C °anye de°. — 14. C °muktiye anye devâḥ rû°. — 15¹. C °devâḥ vai°. — 15². C °yaṁ de bo°.

16¹. C °vṛiksha sajâ°. — 16². BC °vṛiksha saṁ°. — 18. BC °kâye dhimu° C °muktiye | anye° B °ktiye | anye°. — 19². B °sya vanditaratanamaya bo° C °sya vanditanamaye bo°.

परस्परस्य वाञ्छितरत्नमयं बोधिवृक्षं संजानन्ति । अन्ये देवा पीतचन्दनस्य बोधिवृक्षं संजानन्ति । अन्ये देवा सिंहचन्दनस्य बोधिवृक्षं संजानन्ति । अन्ये देवा रसचन्दनस्य बोधिवृक्षं संजानन्ति ॥ यथापीदं स्वकस्वकाये अधिमुक्तीये अन्ये देवा गिरिसारचन्दनस्य बोधिवृक्षं संजानन्ति । अन्ये देवा दिव्यअगुरुचन्दनस्य बोधिवृक्षं संजानन्ति । अन्ये देवा मणिरत्नामयं बोधिवृक्षं संजानन्ति । अन्ये देवा सर्वरत्नालंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवा मणिरत्नविचित्रितं बोधिवृक्षं संजानन्ति । अन्ये देवा दिव्यनीलवैडूर्यालंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवा मुसारगल्वमणिविचित्रितं बोधिवृक्षं संजानन्ति । अन्ये देवा अस्मगर्भमणिरतनविचित्रितं बोधिवृक्षं संजानन्ति । अन्ये देवा हस्तिगर्भमणिरतनविचित्रितं बोधिवृक्षं संजानन्ति । अन्ये देवा ..... मणिरतनविचित्रं बोधि[206b]वृक्षं संजानन्ति । अन्ये देवाः सुप्रभासमणिरतनविचित्रितं बोधिवृक्षं संजानन्ति । अन्ये देवा अमृताश्मगर्भेहि मणिरतनेहि समलंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवा समन्तचन्द्रेहि समलंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवास्सुचन्द्रेहि समलंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवास्सूर्यावभासेहि समलंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवाः स्फटिकविचित्रं अन्ये देवाः सूर्यविक्रान्तेहि समलंकृतं । अन्ये देवाः चन्द्रोभासेहि समलंकृतं । अन्ये देवा ज्योतिप्रभासेहि समलंकृतं । अन्ये देवा विद्युप्रभासेहि समलंकृतं । अन्ये देवाः समन्तालोकेहि मणिरत्नेहि समलंकृतं । अन्ये देवा मुक्ताप्रभेहि मणिरत्नेहि समलंकृतं । अन्ये देवा अप्रतिहतप्रभेहि मणिरतनेहि समलंकृतं बोधिवृक्षं संजानन्ति । अन्ये देवा रतनसमुच्छ्रयसमलंकृतं । अन्ये देवाः सर्वलोकाग्रभूतेहि मणिरतनेहि समलंकृतं । अन्ये देवाः शक्राभिलग्नेहि मणिरतनेहि समलंकृतं । अन्ये देवा रत्नपत्रेहि सम-

2¹. C °ndanamasya bo°. — 3. C °muktiye | anye° B °ktiye ‖ anya de° C °vṛiksha samñ° B °samjânti | . — 4. C °vṛiksha samñ°. — 5¹. B anya de°. — 5². BC °kṛita bo°.

6. C °vṛiksha samñ°. — 7¹. C °vṛiksha samñ°. — 7². B °devâ susâra° C °musâgalva ° citraṁ bo°. — 8. B anya de° C °niratnavi°. — 9. C °niratnavi° — 10. C °niratnavicitritaṁ bo°.

11. B anya de° C °devâ su ° niratnavi° B °citritaṁ bo°. — 12¹. B °mṛitâçcagarbhe° C °mṛitâçvagarbhe ° ratnehi°. — 12². B aṁnye° C °samantehi candre°. — 13. C °devâ sucandre ° kṛitehi bo°. — 14. B °nti anye°. — 15. C °devâ sphaṭitavicitraṁ samalaṁkṛitaṁ bodhivṛikshaṁ saṁjânanti | anye devâḥ sû°.

16¹. C °devâḥ jyo ° taṁ | anye devâḥ sama°. — 16². (*omis dans* C). — 17. B anya de°. — 18¹. C °devâḥ mu° BC °muktapra°. — 18². C °bhehi ratnehi sa°. — 19. B anya de° C °devâḥ samucchriyasama°. — 20. B anya de° BC °lokagrasatehi maṇiratane(C °niratne)hi sa°.

21¹. B °çakrâhilogne° C °ratnehi sa° B °taṁ anye°. — 21². C °devâḥ ra° B °tnapattihi sama° BC °taṁ anye°.

लंकृतं । अन्ये देवा उरगगर्भमणिरतनेहि समलंकृतं । अन्ये चन्दनप्रभेहि समलंकृतं । अन्ये लोहिताक्षेहि समलंकृतं । अन्ये गजपतीहि मणिरतनेहि समलंकृतं । अन्ये महेश्वरदत्तेहि मणिरतनेहि समलंकृतं । अन्ये रसकेहि समलंकृतं । अन्ये गोमेदकेहि मणिरतनेहि समलंकृतं । अन्ये देवा शृंगेहि मणिरतनेहि समलंकृतं बोधिवृक्षं संजानन्ति । अन्ये लालाटिकेहि मणिरतनेहि समलंकृतं । अन्ये शिरिगर्भेहि मणिरतनेहि अन्ये तालिकेहि मणीहि एतेहि च अन्येहि च दिव्येहि मणिरतनेहि समलंकृतं बोधिवृक्षं संजानन्ति ॥

येषां देवानां ततोनिदानं कुशलमूलो परिपक्षिष्यति अनुत्तराये सम्यक्संबुद्धाये ते यथाकुशलमूलेहि बोधिवृक्षं संजानेन्सुः । नीलमुक्ताहारेहि लोहितमुक्ताहारेहि श्वेतमुक्ताहारेहि कण्ठनिष्केहि सुवर्णसूत्रेहि कुण्डलेहि मुद्रिकाहि परिहारकेहि वलयकेहि नूपुरेहि वेष्टनकेहि मुद्राहस्तकेहि आवापकेहि रतनदामकेहि पट्टदामकेहि पुष्पदाम[207a]केहि सुवर्णकेयूरेहि रत्नहारेहि रुचकहारेहि मन्दारवदामेहि हंसदामेहि सिंहलताहि वजिराकारेहि स्वस्तिकेहि एतेहि चान्येहि च दिव्येहि आभरणेहि समलंकृतं बोधिवृक्षं संजानेन्सुः ॥ येषां बोधिवृक्षं पश्चित्वा कुशलमूलानि जायन्ति ते देवाः स्वलंकृतं बोधिवृक्षं संजानन्ति । अन्ये एतेहि चान्येहि च यथापरिकीर्तितेहि अलंकारेहि बोधिवृक्षं समलंकृतं संजानन्ति ॥ तत्र केचिद्देवा योजनं उच्चत्वेन बोधिवृक्षं संजानन्ति । अन्ये देवाः पंचयोजनमुच्चत्वेन । अन्ये दशयोजनमुच्चत्वेन ।

1¹. C °devâḥ uragarbhamaṇihi sa° B °uragarbha°. — 1². C anye devâḥ canda°. — 2¹. C anye devâḥ lohitikehi sama°. — 2². anye devâḥ gajapatihi maṇiratnehi sa°. — 3¹. C anye devâḥ mahe ° ttehi sama°. — 3². C anye devâḥ ra°. — 4¹. C anye devâḥ go° BC °gomasake° C °kehi ratnehi sa°. — 4². C °devâḥ çaçakehi maṇiratnehi sa°. — 5¹. C anye he vâ (?) lâutake maṇiratnehi sa° B | anye lâuttikehi maṇi°. — 5². C anye devâḥ çirigabhehi maṇiratanehi | anye devâ tâlikehi maṇihi ratnehi etehi cânyehi ca divyehi maṇiratnehi samalaṁ° B °rbhehi maṇiratanehi | anye tânikehi maṇihi ca etehi anye ca di°.

8. C °to kuçalamûlo nidânaṁ paripâcishya° BC °shyati | anuttarâye saṁmya° C °ddhâye yathâkuçalehi bo ° jânatsuḥ | B °netsuḥ | . — 9. BC nîlamuktahârehi lo° C °hitamuktârehi çve° B °kaṇṭhanishkebhi su ° trehi kuntikehi madri° C °kuṇḍikehi mudri ° hi nûpûrehi jasustarakehi mudra ° B °hârakehi calaya ° purehi yashṭarakehi mudraha° BC °stakehi ovâtakehi ratana(C °tna)dame(B °make)hi paṭṭa° C °ṭṭadâmehi pushpadâmehi suvarṇṇapurehi ratnadâmehi mandâravâdâmehi rucakradâmehi haṁsadâmehi siṁharatâvajinakârehi sva° B °rṇṇakayû ° hi haṁsadârehi siṁ ° jinakorehi sva° C °cânyehi ca yathâparikîrttehi ca di° B °vyehi ca âbha° BC °jânetsuḥ | .

14. B °lâni yâyanti te de° C °devâs svalaṁ ° ksha saṁ°. — 15. C °cânyehi yathâ° BC °rttitâhi alaṁ°.

16. C tatra devâ kecid yojanam ucca ° nti | anye devâ dviyojanatriyojanam uccatvena bodhivṛikshaṁ saṁjânanti | anye devâ caturyojanam uccatvena bodhivṛikshaṁ saṁjânanti | . — 17¹. B °vâḥ yaṁcayo°. — 17². C anye devâḥ daça°.

अन्ये विंशयोजनमुच्चत्वेन । अन्ये त्रिंशयोजनमुच्चत्वेन । अन्ये चत्वारिंशयोजनमुच्चत्वेन । अन्ये देवा पंचाशद्योजनमुच्चत्वेन बोधिवृक्षं संजानन्ति । अन्ये योजनशतमुच्चत्वेन बोधिवृक्षं संजानन्ति । यथास्वकस्वकेन ज्ञानेन बोधिवृक्षमुच्चत्वेन संजानन्ति ॥ सन्ति देवा योजनसहस्रमुच्चत्वेन बोधिवृक्षं संजानन्ति । सन्ति देवा दीर्घायुष्का पुरिमजिनकृताधिकारा योजनशतसहस्रमुच्चत्वेन बोधिवृक्षं संजानन्ति । सन्ति देवपुत्रा अभिसंजातकुशलमूलनिर्याता यावद्भवाग्रमुच्चत्वेन बोधिवृक्षं संजानन्ति ॥ तत्र केचिद्देवा सर्वरतननिर्यूहं सिंहासनं बोधिवृक्षमूले अदृश्नेन्सुः । दिव्यं बहुयोजनमुच्चत्वेन दिव्यदुष्यसंस्तृतं रतनजालसंछन्नं किङ्किनीजालसमलंकृतं । अन्ये देवा योजनशतसहस्रमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा योजनसहस्रमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा अर्द्धतिययोजनशतानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा द्वे योजनशतानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा योजनशतमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा पंचाशद्योजनानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा चत्वारिंशद्योजनानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा त्रिंशद्योजनानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा विंशद्योजनानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा दशयोजनानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा चतुर्योजनानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा त्रियोजनमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा द्वियोज-

1¹. C °nye devâḥ viṁçadyoja° B °tvena anye°. — 1². C °nye devâs triṁça°. — 1³ C °nye devâç catvâriṁçadyoja° B °tvenâ bodhi°. — 2¹. C °tvenaḥ | bo°. — 2². C °nye devâḥ çatayojanam ucca°. — 3. BC °vṛikshaṁm u° B °ccatvâ saṁ°. — 4¹. C °devâḥ jana° B °vâ jana° C °vṛiksha saṁ°. — 4². C °devâḥ di° B °dhikâ yo°.

6. C °vâgra paryyantam ucca°. — 7. C °d devâḥ sarvaratnoniryyâtasiṁ° B °niryâtasiṁ° BC °çetsuḥ | . — 8. C °janasahasram ucca° C °dushyasaṁstṛitaṁ ratnajâlaṁ saṁcha° B °tanajâlaṁ saṁchannaṁ kikanijâlasamalaṁ° C °nnaṁ kiṁkiṇikajâlasamalaṁ°. — 9¹. C °devâḥ yojanasaha° BC °çetsuḥ | . — 9². C °devâḥ yojanaçatasaha° BC °çetsuḥ | . — 10. B anya de° C °devâḥ a° BC °aṭṭâtiyojana° C °çetsuḥ B °çetsu a°.

11. B anya de° C °devâḥ dve° B °çatânim ucca° BC °çetsuḥ | . — 12¹. B anya de° C °devâḥ triyo ° çetsuḥ | B °çetsuḥ a°. — 12². C °devâḥ paṁcâṁçayojanaçatam ucca° B °nânim ucca ° çetsuḥ a° C °çetsuḥ | . — 13. B anya devâ° C °devâḥ catvâ ° janam ucca° B °janaçatâni u° ddarçetsuḥ a° C °ddarçetsuḥ | . — 14. B anya de° C °devâḥ triṁ° BC °çetsuḥ | . — 15¹. B anya de° C °devâḥ viṁ ° uccasana siṁ° B °hâsanânim addaçetsuḥ a° C °çetsuḥ | . — 15². B anya de ° C °devâḥ da° B °janaçatâni ucca ° sanânim a° BC °çetsuḥ | .

16. C °devâḥ ca ° tvenam adda° | B °hâsanâni uccatvena siṁhâsanânim adda° BC °çetsuḥ anye(B °nya) devâ(C °vâs) triṁçadyojanâni uccatve(B °tvena uccatve[207ᵇ])na siṁhâsana(B °sanâni)m addaçetsuḥ | . — 17¹. B anya de° C °vâs triyo ° çetsuḥ | B °çetsuḥ a°. — 17². B anya devâ triyojanânim ucca° C °devâḥ dviyojanaṁ ucca ° çetsuḥ | B °çetsuḥ a°.

नानि उच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा योजनमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा त्रिक्रोशमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा द्विक्रोशमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा क्रोशमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा सप्ततालमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा षट्तालमुच्चत्वेन अन्ये देवा पंचतालं अन्ये देवा चतुतालं अन्ये देवा त्रितालं अन्ये देवा द्वितालं अन्ये देवा तालमात्रं बोधिवृक्षस्य मूले सिंहासनमदृश्नेन्सुः । अन्ये देवा सप्तपौरुषेयमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये देवा षट्पौरुषेयमुच्चत्वेन सिंहासनमदृश्नेन्सुः । अन्ये पंचपौरुषेयं अन्ये चतुपौरुषेयं अन्ये त्रिपौरुषेयं अन्ये द्विपौरुषेयं । अन्ये देवा पुरुषमात्रमुच्चत्वेन बोधिवृक्षस्य मूले सिंहासनमदृश्नेन्सुः ॥ तत्र ये लूखाधिमुक्तिका सत्वा ते तृणसंस्तरे निषण्णं बोधिसत्वमदृश्नेन्सुः । तृणसंस्तरे निषीदित्वा बोधिसत्वो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धिष्यतीति ॥

अथ खलु पुन बोधिसत्वः सदेवमानुषासुरस्य लोकस्य पुरतो येन बोधिवृक्षमूलं तेनोपसंक्रमित्वा बोधिवृक्षं त्रिष्कृत्वो प्रदक्षिणीकृत्वा पुरिमका तथागता समनुस्मरन्तो निषीदि पर्यंकमाभुंजित्वा ऋजुं कायं प्रणिधाय प्रतिमुखां स्मृतिं प्रतिस्थापयित्वा ॥ तत्र चैवं बोधिवृक्षमूले निषण्णस्य बोधिसत्वस्य मुखमण्डलं भासति तपति विरोचते । सद्यथापि नाम महासाहस्रलोकधातुविस्तृतं सूर्यमण्डलं वा । यस्य तेजेन सर्वावन्ता त्रिसाहस्रमहासाहस्रा लोकधातु जिह्मवर्णा अस्यात् ॥ सद्यथापि

1. B anya de° C °devâḥ yo ° çetsuḥ | B °ddaçotsuḥ | . — 2¹. B anya de° C °devâḥ tri° BC °trikoça ° nam adaçetsuḥ | . — 2². C °devâḥ dvikroçam ucatve° B °dvikoça ° hâsanenam addaçetsuḥ kro° C °çetsuḥ | . — 3¹. B kroça° C anye devâḥ kro° B °çetsuḥ | . — 3². C °devâḥ sapta ° çetsuḥ | B °çetsuḥ a°. — 4. C aṁnya devâḥ shaṭṭâlaṁ anye devâḥ paṁ° B °shaṭṭâlaṁm ucca° C °devâḥ catu ° vâs tritâ ° nye devâḥ dvi ° vâs tâlamâ ° kshasyaḥ mû° B °mûre siṁ° C °sanaṁm addasetsuḥ | B °ddasetsuḥ a°.

6. C °vâs sapta ° çetsuḥ | B °çetsuḥ a°. — 7¹. C °devâḥ sha ° hânam adda° BC °çetsuḥ a°. — 7². C anye devâḥ paṁ ° sheya anya devâ catu ° sheya | anye tri° B °anya tri ° yaṁ anya dvi°. — 8. C anya devâḥ pau° BC °hâsanem addaçetsuḥ | . — 9. C °tra ye lukhâ° B °lûshâdhi° C °nasantare nisharṇṇaṁ bo° BC °çetsuḥ tri°. — 10. B °râṁ saṁmya°.

12. C °khalu bodhisatvo sade ° sya lokaṁ purato° B °loke pura ° mûle teno° C °shkritya pradakshi ° rimakânâṁ tathâgatâṁ sama° B °gato sama° C °smaraṁto nishi ° jitvâ ṛiju kâyaṁ praṇi ° smṛitiṁm upasthâ°. — 15. BC °cedaṁ bo ° sharṇṇasya bo° B °tva mukha ° sati tayati vi°.

16¹. C sadyathîdaṁ nâ° BC °hâsâhasraṁ lo° C °dhâtuṁ vi° BC °laṁ vâ ya°. — 16². BC °hâsâhasro lo° C °dhâtuṁ jihmavarṇṇam asyât ‖ . — 17. C saryyathâ° B °nâma jaṁbûnada° C °jambunadasya suvarṇṇasya biṁbasya pu ° sthûlakalo masi° B °nâkalo maṇinibhâ | sa tapati viro° C °bhâ so na tapa° BC °svarâ | e° C °m evaṁ bo ° hâsâhasralo° B °hâsâhasro lo° C °dhâtus tejena abhûshi abhibhûtaḥ ‖ .

नाम जाम्बूनदस्य बिम्बस्य पुरतो विदग्धश्यूणा काला मसिनिभा न तपति न विरोचति न च भवति प्रभास्वरा एवमेव बोधिसत्वेन त्रिसाहस्रमहासाहस्रा लोकधातुः तेजेन अभिभूता अभूषि ॥ तत्र ये देवपुत्रा याव अकनिष्ठातो उपरि बोधिसत्वं निषण्णं अद्दशेन्सुः तत्र भूम्या देवा समानं बोधिसत्वं अद्दशेन्सुः ॥ तथा अन्तरीक्षे यावत्तुषिता निर्माणरति परिनिर्मितवशवर्ति मारभवनातः सिंहासनगतं बोधिसत्वं संजानन्ति ॥ एवं ब्रह्मा देवा ब्रह्मकायिका देवा ब्रह्मपुरोहिता देवा महाब्रह्मा देवा आभा देवा आभास्वरा देवा शुभा देवा परीत्तशुभा देवा अप्रमाणशुभा देवा शुभकृत्स्ना देवा बृहत्फला देवा अवृहा देवा अतपा देवा सुदर्शना देवा अकनिष्ठा देवा सिंहासनगतं बोधिसत्वं संजानेन्सुः ॥ ये च त्रिसाहस्रमहासाहस्राये लोकधातूये कुशलमूलसमन्वागता सत्वा पर्यन्तस्थायिनः ते सर्वे सिंहासनगतं बोधिसत्वं संजानेन्सुः ॥ ये अवरुद्धकुशलमूला सत्वा पुरिमजिनकृताधिकारा कामधातुपर्यापन्नाः ते मारं न पश्यन्ति न संजानन्ति बोधिसत्वस्य पूजां करोन्ता बोधिसत्वं नमस्यमानाः बोधिसत्वानुभावेन ॥

अथ खलु मारः पापीयां स्वकं बलं ध्यामबलं संजानति सर्वावतीं च त्रिसाहस्रमहासाहस्रां लोकधातुं अभिनतां येन बोधिसत्वो । महासत्वस्य इमं प्रतिसंश्चिचति । न तावदहं अनुत्तरां सम्यक्संबोधिमभिसंबुद्धिष्यामि यावन्न मारं पापीमं सार्धं बलकायेन सन्नद्धमागतं पराजिष्यामि मा सत्वानामेवं भवेया अनाश्चर्यमेतं यं बोधिप्राप्तेन मारो निगृहीतः स्वकं च स्थामं ऋद्धिप्रातिहार्येण बोधिसत्वः सदेवकस्य लोकस्य पुरतो उपदर्शितुकामः एवं दृढस्थामवेगऋद्धिप्राप्तो बोधिसत्व इति च मम च अनुश्चित्वा अनुत्तराये सम्यक्संबोधिये चित्तमुत्पादयिष्यन्ति ॥ अथ खलु मारो पापीमां दुःखी दुर्मनो शोकशल्यविद्धः प्रतिराजसंज्ञां बोधिसत्वे उपस्थापेत्वा चतुरंगिनीं मारसेनां उद्योजयित्वा बहुयोजनशतां हरित्वा येन बोधिवृक्षमूलं तेनोपसंक्रमि बोधिसत्वं पश्चिष्यामो ति ॥ सो न प्रभवति बोधिसत्वं द्रष्टुं चक्षुविभ्रममनुप्राप्तः सचेद्बोधिसत्वो मुखवाटमोसिरेया येन स्थामेन बोधिसत्वो समन्वागतो अभूषि । सचेदयं त्रिसाहस्रमहासाहस्रो लोकधातुर्वज्रमयो महापर्वतः अभविष्यत्तां लोकधातुं बोधिसत्वः परमाणुरज[208b]सदृशीं विधूनित्वा असंख्येया लोकधातुयो अभुत्विपेया न च एको पि परमाणुरजो द्वितीयेन परमाणुरजेन सार्धं समये ॥ बोधिसत्वो च ततो मारपरिषाये बह्वं सत्वां कुशलमूलानद्राक्षीत् ये इमं बोधिसत्वस्य एवंरूपं ऋद्धिप्रातिहार्यं दृष्ट्वा अनुत्तराये सम्यक्संबोधाय चित्तमुत्पादयिष्यन्तीति । एतमर्थपदं बोधिसत्वो संपश्यमानो आगमेति न तावज्जिनित्वा मारं सबलवाहनं अनुत्तरां सम्यक्संबोधिमभिसंबुद्धिष्यामीति ॥ अथ खलु भगवां तायें वेलायें इमां गाथामध्यभाषि ॥

यथा स्वयंभू स्थितो बोधिमूले
शाक्यान राजा सुविशुद्धसत्वो ।
सुवर्णबिम्बं यथ दर्शनीयो
जाम्बूनदं अपगतसर्वक्लेशो ॥
ओभासजाता दिशता अभूषि
मारस्य चक्षो अभु कृच्छ्रप्राप्तो ।

3. C °yâvad akani° B °nishṭâto° C °to vopari bo ° sharṇṇaṁ addaçetsuḥ | tatra bhû° B °sharṇṇaṁ addetsuḥ tatra bhû° BC °bhûmyâṁ devâ samâṇaṁ bo° C °çetsuḥ | . — 4. C tathântarî ° devâs trâya ° rmitavasavartti° B °rtti mâraḥ bha° BC °bhavanâtaḥ(C °to) samâsenagataṁ° C °dhivṛikshe saṁ°.

6. C evaṁ brahmâ devo brahmakâ° BC °hâbrahmâ âbhâ° C ° svarâ devâ çubhâ devâ apramâṇaçubhâ devâ parittaçubhâ devâ çubhakṛitsnâ° B °rittaçubhâ devâ çubhâ devâ parittaçubhâ devâ apramâṇaçubhâ devâ devâ çubhakṛitsnâ° BC °nishṭâ devâ samâsana(C °naṁ)gataṁ bo° C °netsuḥ | B °netsuḥ ye ca tri°. — 10. C °hâsâhasraḥ ye dhâtuye ku° B °tûye çalamû° BC °mûlâsama° C °tâ satvâḥ paryyanto sthâ° B °ryantaḥ sthâ° BC °rve samâsana(C °naṁ)gataṁ bo° C °netsuḥ | B °netsuḥ ye ava°.

11. C ye avalupta ° pannâs te mâ° BC °raṁ paçya° B °rontâṁ bodhisatvo namasya°. — 14. C °mâro pâpîmâṁ sva° B °piyâ sva° BC °dhyânaba ° jânanti(C °nti |) sarvâvatî ca tri ° hâsâhasrâ(C °sro) lokadhâtu abhi ° tvo mahâ°. — 15. C mahâsatvo idaṁ prâtisaṁ° B °kshati na tâ°.

16. BC °râṁ saṁmya° C °buddhishyâmaḥ | yâ° BC °pîmâṁ sârddhaṁ° B °gataṁ pariji° C °mi | mâ satvanâm evaṁ° B °tvânâṁm evaṁ ° veyâ anâcâryâyam etaṁ yaṁ° C °hito svakaṁ ca sthânaṁ ca ṛiddhiprâtihâryyeṇa bodhisatvo made ° prâpta bodhisatvar iti | mama cânuçi ° râye saṁmyaksaṁbodhiye ci ° yishyaṁti ‖ .

2. B °ḥkhî daurmano çâka° C °ḥkhî daurmanasya ço° B °viddha pra° BC °jasaṁjñâ bodhisatve(C °tvo) upasthâmetvâ catu° B °huyojanaçatâ hari° BC °kramitvâ bodhi° C °shyâmeti. — 5. BC °ced yadi bodhisatvo° C °khavâtaṁ o° B °satvo samanvâ°.

7. C °trisâhasraṁmahâ° BC °sâhasro lokadhâtu(C °tuḥ va)jamayo(C °ye) mahâparva° C °rvato abha° B °shyantâṁ lokadhâtuṁ° C °shyentâṁ lokadhâtûṁ bodhisatvo paramâṇurajasadṛiçâṁ vidhû° B °dṛiçî vidhûnitvâ asaṁkheyâ lo ° bhyukshipeyâ na ca e° C °eko pi ekam api pacamâṇu ° jena sârddha samayâ | B °rddhaṁ samayâ | . — 10. C °tataḥ mâraparishâyaṁ ba°, B °bahuṁ satvâṁ° C °mûlâṁ adrâkshit | ye i° B °lân adrakshit | ye i° C °ṛiddhiṁ prâ ° râya saṁmyaksaṁbuddhâye ci° B °cittaṁ utpâ° C °shyantiti ‖ .

12. C etam arthaṁ padaṁ° BC °meti | na° C °tâvad aji ° râṁ saṁmya° B °bodhi saṁbu° C °buddhishyâmiti ‖ . — 13. C °gavân tâye ve ° thâm abhâshe | B °thâ adhya°. — 15. C °svayambhûḥ sthi° B °yaṁbhu sthi°.

17. BC °yathâ darça°. — 19. C °çatâm abhû° B °shi | mâ° BC °sto abhû kṛi° C °prâptaḥ | B °pto kiṁ°.

किं तं हि नाम मह्यं भेष्यतीति
रतिं न विन्दामि विमान अस्मिं ॥
विमान सर्वा अभु व्योमवर्णा
प्रासादश्रेष्ठा वरचन्दनस्य ।
सुवर्णसूत्रा स्फटिकप्रवाडा
मा खु च्यविथं इतो अद्य स्थानात् ॥
स्फुटा गवाक्षा रुचिरार्धचन्द्रा
मुसारगल्वकवचिता च गर्भा ।
वैरोचनस्य जगतो विशिष्टा
आभा अभू भविष्यति किं तु अद्य ॥
ग्रीर्षातो मह्यं मकुटो प्रलुप्तो
शुभा च आभा विगता ममाद्य ।
संगीति मह्यं स्थिता अप्सराणां
मा खु च्यविथं इतो अद्य स्थानात् ॥
जाम्बूनदेन यथ कांचनेन
व्योमे विमाना कृतजिह्मवर्णा ।
इमे ये दिव्या इमे ये विमाना
जिह्मा अभू उपगते बोधिसत्वे ॥
सो चादृशासि भगवन्तं स्वयंभुं
निषण्णं सिंहं यथ दुष्प्रधर्षं ।

1. B kiñ na hi nâ° C kiñ ne hi nâmañ mama mahya bhavishyati ra° B °hyañ bhavishyati ra° C °na vṛindâmi vimânam asmiñ ‖ B °ndâmi nâsmiñ vimâ°. — 3. BC °abhû vyo° B °mavallâ prâ° C °mavarṇṇâñ prâ° BC °çreshṭâ vara° B °ndasyâ su°. — 5. C °rṇṇasutrâ° B °sûtro spha° C °pravâlâ mâ° C °itar evam asthât | B °ito hi tañ sthânât | .

7. C °rddhâcandrâḥ musâgalvâ kavacitasya garbhâ | B °galvâ kavacita tâñ svagarbhâ vai°. — 9. B °gati viçishṭa â° C °gatî viçishṭo â° BC °âbhâ bha° C °vishyañ adhunâ bhavishyati° BC °ti | kiñ tu adya çi°.

11. B çîryato mahya maku° C çîryyanto ca mama mahya makûṭo pra° C °çubhâ vigatâ ca âbhâ | mamâdya B °tâ | mamâdya sañ°. — 13. BC °sthitam apsa ° vishya i° C °iter adya°. — 15. BC jâmbunadena yathâ kâñcanena shyâmâvino na (C °vilola)kṛi° B °vallâ | C °varṇṇâḥ | .

17. C iyam eva divyâ iyañ me vi° B ime ya di° C °mânâḥ ji ° satvo | B °satve so°. — 19. B so sâdṛiço tâdṛiço si bha° C so sâdṛiço tâdrigasime bhavantañ° B °yañbhuvañ nisharṇṇañ siñha yathâ pradushyañ dharshañ viçu° C °bhuñvañ tu siñhañ yathâ nisharṇṇo | pradushyadharmañ gajasatva°.

विशुद्धसारं जगसत्त्वसारं
जाम्बूनदस्य यथ यूपो भासे ॥
देवा दिवि प्रतिष्ठिता मुक्तिहारा
सुवर्णकम्बूरुचिरा मनोज्ञा ।
सुवर्णसूत्रां ग्रहिय प्रहृष्टा
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
सुवस्तिकाश्च शुभा अर्धचन्द्रा
सिंहीलताहि स्फुटा बोधिवृक्षे ।
विद्युप्रभां च रतनां ग्रहेत्वा
अलंकरोन्ति मुदितदेवपुत्रा ॥
चन्द्रप्रभां च रतनां ग्रहेत्वा
सूर्यकान्ता च रतनां गृहेत्वा ।
वैरोचनां मणिरत्नां ग्रहेत्वा
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
मुक्ताप्रभा च रतनां ग्रहेत्वा
ओभासयन्तां शुभदर्शनीयां ।
प्रामोद्यजाता मुदितहृष्टचित्ताः
अलंकरोन्ति भग[209ᵃ]वतो बोधिवृक्षं ॥
समन्तचन्द्रा मणिरतनां ग्रहेत्वा
रतनावलिं सुरुचिरदर्शनीयां ।

1. C gajasatvamârañ viçuddhasârañ suviçuddhasârañ ‖ jâmbuna° B °jâmbunadasya yathâ yûsho bhâse deveshu di° C °yathâ yûtha bhâso deveshu di°. — 3. B divyâ pra° C divyâni ca muktihârâḥ su ° B °muktâhârâ suvallakañcurucitâ | manojñâ su° C °kañcurucitâ manojñâḥ su°. — 5. B suvallasû° C °rṇṇacitrâñ gṛihiya prahṛishṭo | a° B °grahiya prahṛi ° roti bha° B °nti | bha° C °gavatâ bo ° kshañ so svasti° B °kshañ çocasti°.

7. B çocastikâ çu° C sosvastikâçca(?) çu° BC °çubha a° B °simhalatâ° C °simhonatâhi° BC °sphuṭe bodhivṛiksho vi°. — 9. C vidyunprabhâñ° BC °nti pramu° C °trâḥ ca° B °trâ ca°.

11. C °bhâñ ratanâñ gṛihîtvâ sû° B °bhâñ ca ratnâñ gra ° ntâ ratanâñ gṛihetvâ sûryâkântaratanaprapradhâna vai° C °ryakântiñ ca ratanâñ pradhâna vai°. — 13. C °rocanâ ca ratanâñ gṛihîtvâ | alañ° B °tvâ jâlañ ° nti | bha ° vṛiksho mu°. — 15. B muktaprabhâ rata° C mukteprabhâ maṇiratanâñ gṛihîtvâ obhâsatâñ ca çu° B °obhâsantâñ çubhadaniyañ prâ°.

17. BC °jâtâ pramu° B °ttâḥ atrañka°. — 19. C °ṇiratnañ gṛihîtvâ ratnâva° BC °liñ sarucirâñ darça°.

गोमेदकां मणिरतनां ग्रहेत्वा
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
अन्ये ग्रहेत्वा शुभलोहिताक्षां
शिरिगर्भशुद्धां रतनां ग्रहेत्वा ।
.....
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
रक्ताङ्गियो च रुचकां ग्रहेत्वा
महेश्वरां सुरुचिरवर्णवन्ता ।
कर्केतनां च रतनां ग्रहेत्वा
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
नीलां च मुक्तां तथ श्वेतमुक्ता
रक्तां च मुक्तां शुभवर्णनीयां ।
हर्षं जनेत्वान च वेगजाता
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
ज्योतिकां च मणिरतनां ग्रहेत्वा
ये चन्द्रसूर्या अभिभवन्ति तेजसा ।
विशेषप्राप्ता मणिरतनां ग्रहेत्वा
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
नागामणीं च शुभवर्णनीयां
गुह्या विशुद्धाचियो मोदमाना ।
नभे स्थिहित्वा तद् ऋद्धिमन्तो
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
ब्रह्मा सहस्रा उपगता बोधिमण्डं

1. C gomasakâṁ° B gomesakâṁ° C °ṇiratnâṁ gṛihîtvâ a ° vṛikshe | raktâ° (l. 7). — 3. B °hitâkshaṁ çi ° tvâ alaṁ°.

6. B °vataḥ bo ° kshaṁ | grahetvâ tadâ alaṁkaronti bhagavato bodhivṛikshaṁ | . — 7. B lakkâtviyâṁ ca ru° C raktâsiyâṁ ca rucakâṁ gṛihîtvâ° BC °çvara saruci° C °ciraṁ varṇṇavanto | B °vallavantâ karke°. — 9. C °nâṁ gṛihîtvâ a°.

11. C nllaṁ ca° BC °tathâ çve° C °tamuktâḥ ra°. — 13. C harsha ja° B °roti bha° C °vṛikshe | . — 15. C jyotiṁ ca vâ maṇi° B °tikaṁ vâ maṇi° C °nâṁ gṛihîtvâ ye candramasûryyâbhi° B °ndramasû°.

17. C °ṇiratna gṛihîtvâ° B °vataḥ bo°. — 19. BC nâgâmaṇiṁ ca su(C °çu)bha° B °guhyaviçuddhâṁkshiye mo° C °çuddhâṁ kshipe modamânâṁ B °mânâ nabhe°.

21. C °tvâ tato ṛi° B °da riddhimantâ alaṁ°. — 23. B brahma sa° C brahmâ sahasrâṁ u ° ṇḍaṁ çakrâçca devâ a° B °çakâçca devâ a°.

शक्रश्च देवो अधिपति गुह्यकानां ।
येहि दृष्टा पुरिमकलोकनाथा
ते देवता च प्रणता स्वयंभुं ॥
आभास्वरा उपगता देवपुत्रा
शुभा च देवपुत्र शुभकृत्स्ना ।
....रूपा च बृहत्फला च
अतपा सुदर्शना च अकनिष्ठा
अलंकरोन्ति भगवतो बोधिवृक्षं ॥
संछन्नो सर्वो अभु बोधिवृक्षो
रश्मीं सहस्रां किरे अप्रमेयां ।
दिव्यैर्मणीभिः प्रतपति बुद्धचेचं
सर्वा सहां अभिभवे लोकधातुं ॥
तस्यैवं चित्तमज्ञ प्रमत्तबंधुनो
मा हेव मे च्यावये आसनातो ।
एषैव राजा भवे देवतानां
न चास्य अस्ति समो सर्वलोके ॥
अथापि बुद्धो भवे धर्मस्वामी
सून्या विमाना भवे देवतानां ।
देशेत मार्गं शिवशान्तिचेमं
न भूय मह्यं भवे ईश्वरत्वं ॥
उत्सदप्राप्तं भवे बुद्धचेचं
माराण कोटी संयोजयन्तो ।

2. B yehî dṛishṭvâ puri° C ye dṛishṭa dṛishṭvâ purimako lo° BC °nâtho te de° B °vatâ pra° C °svayambhuḥ | B °yaṁbhû | . — 4. B °gata de° C °tâ devaputro çubhâ ca devâ çubhakâsinâmaḥ ‖ rû° B °bhakâçinâma rûpâ°.

6. C rûpo bṛihatphalâ ata ° rçano alaṁ° B rûpâ bṛihatphalâsu | apâtasudarçanâ sudarçano alakalonti bha°. — 9. B °channârarvâ abhû bo° C °abhût bodhi° B °ksho | rasmiṁ sa° C °raçmiṁ sahasrâṁ kilam apra° BC °meyaṁ | .

11. B divyai marṇibhiḥ pratapati(?) bu °traṁ sarvâsahâṁ abhibhava lo°. — 13. B °ttam abhû pama° C °cittam abhûn pama ° no mâ haiva me cyâvayed âsa°.— 15. C °samâ sa°.

17. C °ddho bhaved dharma° B °svâmi | sunyâ° C °mi çûnyâ vimâ bhave de° B °nâ bhaved devatânâm deçe°. — 19. BC deçenti mâ° C °mârge ṇivaçâ° BC °maṁ | na bhû° C °ya mârgaṁ bhaved îçva° B °ve içva°.

21. BC °ved buddha° C °râna koṭi sayo° B °koṭisayo°.

सन्नद्धवर्मा कवचितवर्मा
संग्रामकाले भवथाप्रमत्ता ॥
उद्योजयित्वान स मारसेनां
उपसंक्रमित्वा वरपादपेन्द्रं ।
अद्राक्षीत्कृष्णो तथ बोधिसत्वं
सूर्या सहस्रं यथ अन्तरीक्षे ॥
तस्यैव चित्तं अभु वेपमानं
एषो न शक्यो मये धर्षणाये ।
लोके भिप्रेतं रतनं ग्रहेत्वा
राज्यानपेक्षं जनयित्व छन्दं ॥
विशुद्धशीलो सद ब्रह्मचारी ।
समादियित्वा पवनं व्रजित्वा
अरिक्तध्यानो सुविशेषप्राप्तो ॥
न ध्यानहानिर्भवते कदाचित्
न बोधिचित्तं जहते कदाचित् ।
मैत्राविहारी सद हृष्टचित्तो
ददित्व च्छत्रं जिनचेतियेषु ॥
वाद्येषु पूजित्व नरर्षभस्य
न शोकशल्या प्रसहन्ति तस्य ।
मनोज्ञघोषो च मनुष्यलोके
स्वरं च तस्य विशुद्ध भोति ॥
विशुद्धश्रोतो च उदग्रचित्तो

2. B °âtmâbhâvo dvâ ° ṇehi yehi°. — 4. B °tyam̃ patapati â ° sya jâ°.

6. B jâmbunada° C °rçanayo atra prakî° B °nîyo aprakî° BC °ṭo dyam̃janehi ‖ . — 8. C abhidyaprâ ° shakaçreshṭo cara° B °shacchreshṭo cara°. — 10. C °vanti kadâci devânâ bho°.

12. B °bhogau rama° C °gaiḥ rama° C °hmacârim̃ | . — 14. B samâdiçitvâ° BC °pto na°.

16. BC na chânahâ° C °hânim̃ bhava° BC °vate kadâcit | na bo° B °hate kadâcit maitrâ° C °hate kadâcin sai°. — 18. C saitrâvi°. — 20. C vâdyatva pù ° çalyo prahasanti° B °çalyo prasahantasya mano°.

22. C °ghosham̃ ca manu° BC °ke | sva° B °ram̃ vata° BC °bhoti vi°. — 24. B °tto | vi° C °tto viçuddhacakshu ca su° BC °jâto çro°.

विशुद्धचक्षू च सुसंप्रजानो ।
श्रोतेन्द्रियेण सुउपेतो भोति
वादेत्व वाद्यं जिनचेतियेषु ॥
जिह्वास्य भोति तनुदर्शनीया
पद्मप्रकाशा यथ पुण्डरीकं ।
रक्त प्रवाडा यथ देवतानां
यं यं स्वरं ओसिरे दर्शनीयं ॥
न जडो भोति अजिह्वो [कुब्जो] न खंजो
न पि विच्छिन्नांगो विशिष्टो भोति ।
प्रवरात्मा भोति प्रवरात्मभावो
वादेत्व वाद्यं जिनचेतियेषु ॥
न तस्य कश्चिज्जनो दुर्मनो स्यात्
देवा च नागा मनुजा महोरगा ।
आश्वासप्राप्तो चरे सर्वलोके
वादेत्व वाद्यं जिनचेतियेषु ॥
न जातु गिलानो भवे पाण्डुरागो
न चापि कुष्ठी नापि च किलासी ।
प्रशंसनीयं लभे आत्मभावं
वादेत्व वाद्यं जिनचेतियेषु ॥
प्रभूतचित्तो च अकुब्जगात्रो
उत्तप्तवर्णो यथ सुवर्णबिंबं ।
दृढसमाधि च असंप्रवेधी

2. C °ndriyena upeksha bhoti | vâdyetva vâdyam̃° B °ṇa su upekshatu bhoti | vâdyetvâ vâdyam̃° BC °shu ji°. — 4. C jihvasya bho° B °ti tadanuda° BC °nîyo padma° B °prakaçâyaḥ | pu° C °prakâçe | pu° BC °ṇḍarîke rakta°.

6. C °pravâya ca de° B °ḍâya ca de° BC °yam̃ yam̃ smaram̃ o° C °oçire da°. — 8. B na jaḍḍo bho° BC °bhoti na jaḍo aji ° pi niçcitâṅgo vi° B °çishṭha bhoti pra° C °çishṭa bhoti pra°. — 10. C pravarâtmabhâvo vâdevâdetva° B pravarâtma bhoti | pravarâtma°.

12. C °no daumanasyam̃ devâ ca nâgâ âsvâsaprâ° B °no daurmanasyam̃ de ° nujo mahorago | â°. — 14. C âsvâsaprâ ° ke vâdyetva vâdyam̃°.

16. C °girâço bha° B °girâno bhave pâṇḍulâge na câpi kushṭi nâpi ca ki° C °câpi tushṭi nâ° BC °lâsi | . — 18. BC prasam̃çanîyam̃° C °labhed âtma° BC °vam̃ vâditva°. — 20. B °tto akubja° C °tto avakubja° ptavarṇṇâ yathâ suvarṇṇabim̃bam̃ | B °bim̃bam̃ dṛi°.

22. C dṛiḍham̃ sa° B dṛiçam̃ sa° BC °mâdhim̃ ca asam̃° C °prabodhi vâdyetva° B °veshim̃ vâde°.

वादेत्व वाद्यं जिनचेतियेषु ॥
देवेषु खो ..... ईश्वरत्वं
मनुष्यलोकं पि गतु पूजनीयो ।
उत्तप्तवीर्यो भवति अमर्दनीयो
वादेत्व वाद्यं जिनचेतियेषु ॥
न सो कहिंचिज्जने अप्रसादं
न चापि कंचित्पुरुषं भणाति ।
पैशुन्य सर्वं विजहति सत्यवादी
वादेत्व वाद्यं जिनचेतियेषु ॥
अलंकारा कृत्व जिनचेतियेषु
स्नापित्व स्तूपानि तथागतानां ।
विशुद्धवाक्यो स्नपयित्व स्तूपं
रजो धोवमानो विरजस्य स्नात्या ॥
धर्मं करित्वा करिकारधर्मं
आरोग्यप्राप्तो चरे सर्वलोके ।
प्रशंसनीयो भवते जनस्य
कारीषि दत्त्वा जिनचेतियेषु ॥
अखण्डशीलो च अरिक्तध्यानो
प्राप्नान सेवां धनमप्रसह्यं ।
आज्ञां करोति बज्रकां जनस्य
कारीषि दत्त्वा जिनचेतियेषु ॥
श्मसानसंज्ञां जनयते दृष्टिकासु

2. BC deveshu bho içvaratve manu° B °loke api gantu pû° C °loke upagantuṁ pû° BC °niyo ua°. — 4. C °yo vâdyetva pâdyaṁ°.

6. B na lokahiṁ° C naro kahiṁcijjanaye apramâdaṁ na câpi kiṁcit puru° B °pi kiṁcin puru°. — 8. C °hati satvavâdi vâdyetva° B °tyavâdi vâde°. — 10. B kârîkṛi° C kâritvakṛi° B °snâyitva stû° C °pitvâ stû°.

12. C °vâkyâ snâpetya stû° B °kyo snâpetya stû° B °paṁ rajadhonamâtaṁ | narajasya smritya karikâradha° C °paṁ rajadhautamânaṁ narajâçca sprishṭâḥ | . — 14. B karikâradharmaṁ â° C dharmaṁ ca kâritva ka ° dharma â° BC °rvalokaṁ | .

16. BC prasaṁçanîyo° B °sya kâ ṛishi datvâ ji° C °rishu datvâ ji°. — 18. BC °prâptâ na se° C °sevî dhanam alpasatyaṁ | B °dhana alpasatyaṁ anyaṁ karo°. — 20. B anyaṁ karohi ba° C anya karo° BC °bahu âtmanasya | (C °syâ) kâ° B °kâ ṛishi datvâ ji° C °kârîti datvâ.

22. BC smaçânasaṁjño ja ° malolâ ca na ra° B °ktavitto | .

न कामलोलो च न रक्तचित्तो ।
लाभाय च्छन्दं [223ª] जहति अशेषं
कारीषि दत्त्वा जिनचेतियेषु ॥
न चित्तपीडां जनये परेषु
न खाद्यभोज्येन जने सौमनस्यं ।
न च दरिद्रो स न चापि रोगी
कारीषि दत्त्वा जिनचेतियेषु ॥
अभिचपत्नो न च तस्य भोति
पूजेति बुद्धां सततं अमेयो ।
बुद्धं च धर्मं जिनश्रावकां च
कारीषि दत्त्वा जिनचेतियेषु ॥
चेत्रा सहस्रा बहवो अनन्ता
जाम्बूनदेन सिया सर्वपूरा ।
शक्यं चपेतुं शिरिमेवरूपां
न तैलविन्दुं जिनस्तूपे दत्त्वा ॥
सदा च भोति वशि आत्मचित्ते
न चेष्टमानो व्रजति कदाचित् ।
अभिन्नहस्तो च अभिन्नपादो
कारीषि दत्त्वा जिनचेतियेषु ॥
उन्मार्गं सर्वं पि जहाति तेन
येन व्रजन्ते बज्रदुर्गतीयो ।
विशोधितो स्य भवे स्वर्गमार्गो
कारीषि दत्त्वा जिनचेतियेषु ॥
नामेत्व चित्तं सहलोकनाथे

3. B lâbho ca cchando ja° C lâbhâva cchando ja° B °kârishî datvâ ji° C °rîti datvâ ji°.

6. C na câpi dâridrya na câpi osaṁehi kârishi datvâ ji° B °dro na ca sa ohî kârishî datvâ ji°. — 8. B °bhoti satataṁ abhedyâ pûjoti buddhaṁ jina° C °buddhaṁ satataṁ abhedyâ | . — 10. B jinaçrâ° C °dharmaṁ ca jina çrâva kârishi datvâ ji° B °kârishî datvâ ji°.

12. C kshetrât sahasrâṁ bahanto jâ° BC °jâmbunade° B °dena çriyâ sa° C °siya sarvapûrṇṇe çakyaṁ°. — 14. C °kyaṁ kshepatuṁ çiri evaṁrû° B °çiri eva° BC °vindu jinastûpa datvâ(C °tvâ |) sadâ°.

16. B °âtmaceti na ceshṭa° C °âtmabhâvo na cettamâno°. — 18. C °sto ca abhinnavâdo kârishi datvâ ji° B °kârishî datvâ ji°. — 20. BC °jahati tena bhonti yena vra°.

22. BC °dhitâ(C °ta) syâ çuve sva° C °rgo kari° BC °rishu datvâ ji°. — 24. B nâmatvâ ci° BC °ttaṁ siyalokanâthaiḥ tai(C °thais tai)la°.

IMPRIMERIE NATIONALE.

तैलस्य विन्दुं जिनचेतियेषु ।
ददेय एकं शतधा करित्वा
तं पुण्यस्कन्धं चपयितुं न शक्यं ॥
दृष्टिका गृह्य भगवतो चेतियेषु
पुण्यस्यार्थाय नरो चेद्धरेय ।
न तस्य जातु अमनोज्ञगन्धं
कायो स्य गन्धं लभे चन्दनस्य ॥
कल्पान कोटीनयुता सहस्रां
विशिष्टकायो भवते शुभांगो ।
विघुष्टशब्दो वरलक्षितांगो
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥
विमानश्रेष्ठं लभते सुगन्धं
दिव्यं मनोज्ञं वरचन्दनस्य ।
न तत्र तृष्णां जनये कदाचित्
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥
कोटीसहस्रं लभते अप्सराणां
मनोज्ञगन्धा च सुदर्शनीया ।
तासां न तृष्णां जनये कदाचित्
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥
अष्टांगुपेतां जलशोभमानां
उद्यानश्रेष्ठां लभते पुष्किरिणी ।
दिव्योत्पलेहि च शोभमाना
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥

2. C dadeyam ekaṁ° B °çatadhya kari° BC °tvâ na pu° B °skandho ksha°. — 4. BC ishṭi(B ishi)kaṁ gṛi ° shu puṇyasya arthâya naro(C °ya jano) cetiyeshu | puṇyasyâ(C °sya a)rthâya naro vedhayeyaṁ | (C °yaṁ) na°.

6. C °jñagandho kâyasya gandhaṁ labhe° B °jñagandhaṁ labhe° BC °bhe vanda°. — 8. B °çishṭhakâ ° vato çu° C °vata çubhâṅgo vi°. — 10. B vighushṭhaçabdo caralakshitâṅgo ço° C °lakshaṇâṁgo | .

12. BC °çreshṭaṁ la ° sya na ta°. — 14. BC °cit ‖ ço ° sya ko°.

16. C °labhed apsa° BC °gandhaṁ su°. — 18. BC °cit | ço° B °çodhatva° C °stûpâṁ pu°. — 20. C °petaṁ ja° BC °çreshṭâṁ la° C °riṇyâḥ | B °riṇyâḥ di°.

22. B divyotparehi çobha° C °lehi çobha°.

परिवारस्तस्य भवते अनुरूपं
दिव्यं च घोषं शृणोति विशुद्धं ।
संगीतिशब्दानि सुरासुराणां
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥
कथां च धार्मीं शृणे देवतानां
संस्कारा सर्वे च दुःखा अनित्या ।
ग्राह्यं च भोति वरदान दानं
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥
जराभिभूतो उपगतो स्वर्गलोकं
न तस्य भूयो इतो दुर्गतीयो ।
स बुद्धं च पश्यति मर्त्यलोके
शोधेत्व स्तूपं द्विपदोत्तमस्य ॥
कथां च कृत्वा शुभ देव[223b]तानां
स्थपेत्व देवा बहुबुद्धस्तूपं ।
कालं करित्व उपगमि मर्त्यलोके
शोधेत्व स्तूपं पुरुषोत्तमस्य ॥
सो जातमात्रो स्मरे कल्पाननन्तां
ये पूर्वं बुद्धा पूजित सत्कृता च ।
नामं च तेषां स्मरति गणं च धर्मं
शोधेत्व स्तूपं द्विपदोत्तमस्य ॥
अनुलेपेन भगवतो यो करोति
पूजां विशिष्टां सुमनोज्ञघोषां ।
सो लब्धलाभो विचरति सर्वलोके
आदिन्नसारो वरगन्ध दत्त्वा ॥

1. B paṛi(?) vâtasyo bhavatânu° C ° vâra tasyo bhavate surupaṁ di ° ṇoti çuddhaṁ | . — 3. B °bdâni pura âsu° C °bdâni puraḥ âsu°. — 5. BC kathaṁ ca dharmo çruṇe° C °skâra sa ° ḥkhâm anityâ | B °tyâ grâ°.

7. B °varadânaṁ ço° C °varadânamadânakaṁ ca ço°. — 9. BC janâbhibhûyo upa° C °gate sva° BC °loke na ta°.

11. B na bu° C na buddha dharmaṁ ca pa° BC °çyati satyalo°. — 13. BC °sthapetya de° C °devâḥ ba ° ddhajñâne | . — 15. B °marttâloke°.

17. C °mâtreṇa smarayesi kalpâṁ pûrvaṁ ca bu° B °pûrva bu°. — 19. B nâmaṁ ca ca te°.

21. BC °lepanena bha° C °shṭâṁ sujñagandhâṁ so la°. — 23. B °ke | âdi° C °ke | adi° BC °ndha datvâ pra°.

प्रलुञ्जकाले जिनशासनस्य
न सो इहागच्छति जम्बुद्वीपे ।
स्वर्गेषु संधावति तस्मि काले
गन्धानुलेपं करियान स्तूपे ॥
दुर्गन्धकामां सुजुगुप्सनीयां
वर्जेति नित्यं स्थितो शीलस्कन्धे ।
सदा चरन्तो इह ब्रह्मचर्यं
गन्धानुलेपं ददियान स्तूपे ॥
इतो च्यवित्वा मरुस्वर्गलोके
अथ सहस्रा तुलयति अप्रमेयां ।
करोति अर्थं बऊदेवतानां
गन्धानुलेपं ददियान स्तूपे ॥
यस्मिं च काले नरा भोन्ति आढ्या
अदुष्टचित्ता मृदुमार्दवा च ।
तस्मिन्तु काले स्थितो जम्बुद्वीपे
गन्धानुलेपं ददियान स्तूपे ॥
अपायभूमिं विजहिय सर्वां
आसन्नप्राप्तो स जिनस्य भोति ।
प्रतीतो भवति सुखप्रेमणीयो
गन्धानुलेपं ददियान स्तूपे ॥
विशिष्टवाक्यो भवति सुघोषो
प्रियो मनापो जनसत्कृतो च ।

1. C °lujyakâ° B °jinasâçana° BC °sya || tato i° C °hâgacchasi jaṁbûdvî° BC °pe sva°. — 3. Ç °vati kâla tasmiṁ | ga° B °le | ga° BC °lepanaṁ ka° B °yânu stû° BC °pe du°. — 5. B °ndhakânâṁ su° C °mâṁ saju° BC °yâṁ || varjje ° skandho sa°.

7. C sadâ vara° BC °ryyaṁ | ga° C °nusepaṁ° B °yânu stû° BC °pe i°. — 9. BC °ke|| atha sahasro tu° C °tulatiyameyâṁ B °yâṁ karo°.

11. BC °nâṁ | ga° C °lepa da° B °yânu stû° BC °pe ya°. — 13. B °nti âdyo || adu° C °nti âḍhyo | adushṭacitto mṛidumodavâ ca tasmi° B °vâ ca tasmi°. — 15. BC °dvîpe | ga° B °yânu stû° BC °stûpe apâ°.

17. B °vijahi sarvâṁ | âsanna° C °vijahi satvâ sarvaṁ | âsanna° BC °prâptâṁ jina° B °sya bhavati prati°. — 19. C prapri bha ° ṇiyaṁ | ga° B °ṇiyo || ga° BC °nulepanaṁ da° B °diyânu stû° BC °pe viçi°.

21. C °çishṭâ vâkyo° BC °to ca su°.

सुखं च तस्य सद सुप्रसन्नं
गन्धानुलेपं ददियान स्तूपे ॥
राजापि भोति वरचक्रवर्ती
श्रेष्ठी अमात्यो गृहपति पुरुषवन्तो ।
बुद्धो पि [भोति] प्रभंकरो धर्मस्वामी
गन्धानुलेपं ददियान स्तूपे ॥
मणिहारं दत्त्वा जिनचेतियेषु
उदग्रचित्तो प्रमुदितो वेगजातो ।
सो भोति राजा सह लक्षणेहि
महानुभावो गुरुकृतो चक्रवर्ती ॥
मणिविमानं रुचिर प्रेमणीयं
विचित्रवर्णं लभे दर्शनीयं ।
प्रासादमग्रं रतनामयं च
महारहाहि स्फुट वेदिकाहि ॥
सो राजधानीं लभते विशिष्टां
नारीगणेहि नरसंप्रपूरां ।
समां सुजातां सुविभक्तरूपां
प्रभूतभोगां बऊधो समन्ता ॥
सुभिक्षचेमां अपगतशर्करां
पुष्पावकीर्णा स्फुटावसक्तदामां ।
सुमनोज्ञघोषां प्रियदर्शनीयां

1. BC °nnaṁ | ga° B °gandhonu° C °lepe dadi° B °yânu stû° BC °pe râ°. — 3. BC râjâ vibho ° varttî || çreshṭi(C °shṭi) amâ ° nto bu°. — 5. BC °bhaṁkaradha° B °lepa dadiyânu stûpe | .

7. BC °ṇivâlaṁ datvâ ji°. — 9. C so bhavati râ° BC °râjasya su(B °du)laksha° C °kṛitaç cakra°.

11. C °naṁ suru° BC °premaṇâyaṁ vi ° rçaṇiyaṁ prâ°. — 13. B °nâmayaṁ mahârhatokanchi sphu° C °yaṁ ca | olokanchi sphu ° kâbhiḥ so°. — 15. BC so rûpadhârî labha ° çishṭaṁ(C °shṭaṁ |) nâ°.

17. B °jâtaṁ su ° husamantâ subhi°. — 19. B °bhikshakshamâ apa° C °bhikshamâ-(C °nâ)nâ apa° B °çarkkara pushpâ ° rṇṇâṁ sphuṭâvaçakta° C ° ṭâ avaçakta°.

21. B °antishṭha uptaṁ ba° C ° antishṭaguptaṁ ba ° madhye udyânarasyâṁ çubharûpâṁ | prabhûtabhogâṁ bahuçâ samantâḥ subhikshamânâ apagataçarkkaraṁ ca | pushpâvakirṇṇâ sphuṭâ avaçaktadâmâṁ sumanojñaghoshâṁ priyadarçaniyâṁ | antishṭaguptaṁ bahuçâlimadhye udyâ°.

अन्तिष्ठगुप्तां वज्रशालिमध्ये ॥
उद्यानरम्यां शुभरुतसन्निनादां
जालविचित्रां [224ª] सुखसंप्रवेशां ।
ध्वजपताकाहि स्फुटां सुरम्यां
छत्रेहि च्छन्नां शुभदर्शनीयां ॥
न तत्र चोरा न शठा न धूर्ता
राज्ये भवन्ति परवित्तहानी ।
ईर्यापथेन उपेत सत्वा
विजिते सन्ति सदा मैत्रचित्ता ॥
अतश्च देवां व्रजते सुपुण्यो
स्वर्गेषु भोति परिपृच्छनीयो ।
किं कार्यं शुक्लं कथमाचरेम
यदा व्रजेम इतो मर्त्यलोके ॥
बुद्धांश्च क्षिप्रं लभे दक्षिणीयां
पश्चित्व सो पूजति लोकनाथां ।
बोधाय च्छन्दं जनयति पूजं कृत्वा
तेनैव बुद्धा हतरज व्याकरोन्ति ॥
वज्रज्ञानी भवति महानुभावो
विशेषभूमिस्थितो अग्रसत्वो ।
चित्तप्रसादं भगवतो एकं कृत्वा
कल्पसहस्रं जहे दुर्गतीयो ॥
आरोचयामि इमु भाषमाणो
मा कोचि कांक्षां जने भाषतो मे ।

2. C °nninâde | jâ° B °nninâdaṁ jâ° BC °jâlâṁ vici° B sukhatrâṁ supraveçâṁ ‖ . — 4. BC dhvajâpatâkâhi sphuṭâ suramyâṁ cchatrâhi channâṁ°.

6. BC °râjyo bhavati paracittahâniṁ ‖ . — 8. B °thena suupeta° C °thena sa upetasatvâṁ jîvita santi ca sadâ° B °jita santi sadâ° C °cittâḥ | .

10. BC °puṇyâ sva° C °svargaṁshu°. — 12. BC °kâryya çu° C °çukla ka ° to ca martte iha dharmaloke | . — 14. B °kshipre la° BC °bhed dakshi° C °paçyanti to sau pûjyati lokanâthaṁ | .

16. C °yati ca pû° BC °pûjâṁ kṛi° C °roti | . — 18. B alujñâni bha° C anujñâ bha ° bhâvâ vi° BC °bhûmiṁ sthi° B °tvo ci°. — 20. C cittopra° B °vatâ e° C °vato eka kṛi° rgatiṁ yo(?) | B °rgato yo | .

22. C °imaṁ bhâshayâmi mâ kaçci kâṁkshâ ja°.

मा बुद्धज्ञानं क्षिपिया अवीचिं
भवेय पश्चा सुदुःखितो कृच्छ्रप्राप्तः ॥
यो जालकानि उपनये चेतियेषु
लोकप्रदीपे महापुण्यक्षेत्रे ।
सो मारजालं विधापिय अप्रमत्तो
भोति नरेन्द्रो दृढबलो निष्क्लेशो ॥
अपायभूमिं विजहति अप्रमत्तो
सदा च बुद्धं हतरज सत्करोति ।
सदा च भोति बलचक्रवर्ती
समन्तलोकं उपगत पुण्यवन्तो ॥
देवेषु भोति मरुपति पूजनीयो
दिव्यं च आयुं लभे तत्र क्षिप्रं ।
यशं च दिव्यं तथापि च दिव्यवर्णं
दिव्यं च सौख्यं असदृशमीश्वरीयं ॥
रूपां च शब्दान्तथ पुनर्गन्धश्रेष्ठां
स्पृष्टव्यां तथा लभे देवभूतो ।
उल्लोकनीयो भवति महानुभावो
न कामतृष्णां जनयति अप्सरासु ॥
ततो च्यवित्व व्रजति मनुष्यलोकं
सुगन्धिताङ्गो भवति विशिष्टवर्णो ।
न पारिहाणिं लभते कदाचित्
क्षोरेत्व जालं जिनचेतियेषु ॥

1. C °ciṁ prâpta bhaveyâ pa ° hkhita kṛi° B °cchrapraptaḥ yo jâ°. — 3. C °ni apanaye ce° B °yeshu | lo ° dîpo mahâ ° kshetre so mâ°. — 5. BC so mâlajâ° C °jâlaṁ vividhâni ca apramatto | bhogâ nare° B °tto | bhotâ narendrâ daçabalâ nishkileçâ apâ° C °balanishkileço.

7. C °miṁ daçabala apra° BC °tto | sadâ°. — 9. B yadâ câ bho° C yadâ ca bho° B °rtti | santasya lo° BC °loke u° B °ganta puṇyâvanto BC °nto de°.

11. C devaisha bhonti maru° B devesha bho ° rupatti pû° C °âyuṁ labhet tatra°. — 13. BC °içvaro yaṁ rû°. — 15. C °n tatha pûrṇṇagaṁdhâṁ | çreshṭâṁ sastabdhâṁ labhed deva° B °tathâ pu ° çreshṭâṁ | spashṭabdhâṁ labhe° BC °bhûto u°.

17. B °llokami bha° BC °bhâvo | na kâ° C °psarâṁsu. — 19. C °lokaṁ | su° BC °rṇṇo na pâ°.

21. C °hâni la° B °hâṇi labhave kadâcit ‖ cchore° C °cit | cchaletva jâ° B °shu çû°.

शूरो च भवति दृढव्रत अप्रमत्तो
न कामभोगे सुरतिं जनेति ।
नैष्क्रम्यतो भवति अदीनचित्तो
क्षोरेत्व जालं जिनचेतियेषु ॥
सो अक्षणानि परिवर्जयित्वा
क्षणा च तस्य भवन्ति विशिष्टा ।
बुद्धान पूजां अतुलियां सो करोति
क्षोरेत्व जालं जिनचेतियेषु ॥
न बोधिचित्तं विजहति सो कदाचित्
न खण्डशीलो भवति असंवृतो वा ।
धर्मं विरागं लभे सो विशुद्धं
क्षोरेत्व जालं जिनचेतियेषु ॥
दौर्वर्णियं च जहे सर्वकालं
दौष्प्रज्ञियं च विजह[224b]ति सो अशेषं ।
विशेषप्राप्तो विचरति सर्वलोके
क्षोरेत्व जालं जिनचेतियेषु ॥
लाभी च भोति शुचिभोजनानां
वस्त्रां विशिष्टां लभे सुवर्णचित्रां ।
रङ्गोपेतां सुरुचिरदर्शनीयां
क्षोरेत्व जालं जिनचेतियेषु ॥
अभ्युद्धरित्वान जिनचेतियेषु
निर्माल्यं तुष्टो प्रमुदितो वेगजातो ।
दुःखां खरां वाचं(?) जुगुप्समानो

1. B çûlo ca bha° C çûro bha°. — 3. C nairkramyamâno bha° B °shkramâto bha ° tto cchelatvaraṁ ji ° shu so a° C °tto çcholetva satvaṁ ji°. — 5. BC °bhavati viçishṭho | .

7. C buddhâç ca pû ° ti cchâdetva jâ° B °ti cchâletva jâ ° shu na bo°. — 9. C °dhisatvaṁ vija°.

11. B °ccholetva° C °cchodetva°. — 13. B dauvarṇṇayaṁ jahe° C dauvarṇṇaṁyaṁ ca jahe° B °sarvaṁ kâ° C °laṁ dushpra° B °shprajñayâṁ ca vi°. — 15. B °ke cchedetva jâ° C °cchodetvâ jâ°.

17. C °nâṁ citriṁ viçishṭo labhe° B °nâṁ vistriṁ viçishṭiṁ labhe°. — 19. B °yâṁ cchâretva° C °yâṁ cchâdetva°.

21. C °rmâlya dushṭo° B °lyaṁ dushṭo° C °jâtoḥ | . — 23. C °kharâṁ ca sa jugupsaniyaṁ ârâ° B °kharâṁ jugupsaniyâṁ ârâ°.

आरागये सो दशबलसार्थवाहं ॥
प्रासादिको भवति विशुद्धकायो
उल्लोकनीयो बहुजनपूजितो च ।
न तस्य राजा भवे दुष्टचित्तो
यो चेतिये अपनयि जीर्णपुष्पं ॥
कुमार्ग तस्यापिहिता भवन्ति
यो शीलस्कन्धे स्थितो बोधिसत्वो ।
अभ्युद्धरेया जिनचेतियेषु
ओसिरे पुष्प पुरिमं मिलानं ॥
शोकं च दोषं च जहे सर्वकालं
रागां च काये जहे सर्व अशेषां ।
आश्वासप्राप्तो सो अनन्तकल्पां
यो चेतिये अपनये जीर्णपुष्पं ॥
बुद्धो च भोति सहसार्थवाहो
अनन्ततेजेन मरूपूजनीयो ।
अलंकृतो भवति विशुद्धकायो
यो चेतिये अपनये जीर्णपुष्पं ॥
पंच दद्येा शुभदिव्यपुष्पां
मान्दारवां अथ पाटलां वा [निर्माल्यां] ।
यो जीर्णं पुष्पं अपनये चेतियेषु
विपाकु तस्य भवति स शोभमानो ॥
न तस्य काये क्रमति विषं न शस्त्रं
ऋतासनं ज्वलितो अग्निस्कन्धो ।

2. BC °jito ca na ta°. — 4. BC °dushṭhaci° B °tto yâ ceti° BC °yi jinapushpaṁ | .

6. C kumâga tasyâpi ° ndhe sthita bo° BC °tvo abhyu°. — 8. B °yeshu | osârapu° C °osare pu° BC °naṁ ço°. — 10. B °laṁ | râgaṁ ca kâ° C °laṁ râgaṁ ca kâ ° rvaçeshâṁ | B °shâṁ âçvâ°.

12. C °pto so nanta° B °lpâṁ | yo ce° BC °shpâṁ bu°. — 14. C °tejo marûpû° B °niyo alaṁ°.

16. B °kâyo | yo ce° C °kâyo ye ce° B °shpaṁ paṁ°. — 18. B °pushpaṁ | mâ° C °pushpaṁ mandâ° B °ravâm atha pâ° C °pâtalâṁ vâ° BC °rmâlya so°. — 20. BC so apanaye cetiyeshu | vi° C °pâkakûṭasya° B °tasyo bha° BC °ti sa çobhano(C °ne) na ta°.

22. C na tasyaiva kâ ° straṁ | hu ° naṁ ca jvalitâ agniskandhau cau° B °tâsano jvalitagniskandho cau°.

चौरा पि तं न प्रसहन्ति पापा
यो जीर्ण पुष्पं अपनये चेतियेषु ॥
न तस्य पुण्यं सुकरं प्रकीर्तितुं
यत्नेन पुण्यं सुमहत् गृहीतं ।
ओसन्नपुष्पं जिनचेतियेषु
क्षोरेत्व तुष्टो प्रमुदितवेगजातो ॥
उद्विद्धकायो भवति उदारो
सदा चरन्तो शुभकर्मश्रेष्ठं ।
न तस्य दूरे वरअग्रबोधि
क्षोरेत्व निर्माल्यं जिनस्य स्तूपे ॥
यो चन्दनं किरेय नायकस्य
क्रन्दं जनेत्वा परमार्थबोधे ।
सो भोति लोके सद् पूजनीयो
प्रासादिको सुमनो तेजवन्तो ॥
तस्यैव राज्ञो प्रणमति सर्वलोको
देवा नागा च मनुजा महोरगा [च] ।
सर्वा सहस्रां कुसुमितलोकधातुं
प्राशासि वीरो ततो ईश्वरत्वे ॥
ये तस्य राज्ये निवसन्ति लोके
प्रतिष्ठन्ति ते वरबुद्धिज्ञाने ।
ते सर्वपापेषु अतिक्रमित्वा
देवमनुष्येषु चरन्ति धर्मं ॥
परिवारस्तस्य भवति अभेद्यो

1. B cauro pi ° pâpaṁ so° C cauro pi taṁ na prajahanti pâpaṁ so° B °jirṇṇapu°. — 3. C °ṇyaṁ mahatâ gṛi° B °ṇyaṁ sumahata gṛi°. — 5. C °shu cchâdetva° B °shu | ccho° BC °jâto u°.

7. C °kâye bha° C °ro | sa° B °nto | çu° BC °çreshṭaṁ na ta°. — 9. B °sya duve va° BC °varamagrabodhiṁ cchore(C °de)tva nirmâ(B °nimâ)lya ji°.

11. C ye candanaṁ ca kare° B °naṁ kare ° ndaṁ janayitva pa° C °netva pa° BC °bodhaye | . — 13. B °niye prâ° BC °dikâ su°. — 15. C °râjâ praṇa ° loke de° BC °devâ ca nâ° C °ragâḥ sarvâṁ°.

17. BC °srâṁ sukumi ° tuṁ prâsâsi vi° C °ratvaṁ | . — 19. BC °shṭhate ti vara°.

21. BC °shu abhikra° C °devâmanu°. — 23. BC °vâritasyâ bhavati abhedya pu° C °tivanto pra° BC ° prajñâvanto | .

पुण्यवन्तो स्मृतिवन्त प्रज्ञवन्तो ।
आ[225ª]श्वासप्राप्तो विचरति सर्वलोके
यथाभिप्रायं जनयति तेषु प्रीतिं ॥
प्रपूरवाक्यं स्वराङ्गं भवति शुद्धं
ज्ञापेति सत्वान् सुसखिलश्लक्ष्णवाक्यो ।
न तस्य कोपि जने ईश्वरीयं
उल्लोकनीयो भवति बऊजनस्य ॥
प्रियवद्य दानं तथ अर्थचर्या
समानार्थता च बऊजनस्य ।
अक्रुष्टवन्तो न जनेति रोषं
यो अंगुलीहि नमे बुद्धस्तूपं ॥
न सो अपायं प्रपतेय भूयः
वर्जेति हीनां कुल मर्त्यलोके ।
आढ्यश्च सो भोति प्रभूतकोशो
यो अंजलीये वन्दति बुद्धस्तूपं ॥
देवेन्द्र भोति गत देवलोकं
मनुष्यभूतो पि च भोति राजा ।
न पारिहानि च कदाचि तस्य
यो अंजलीये वन्दति बुद्धस्तूपं ॥
अयुक्तवाचं न कदाचि भाषे
सुभाषितं भाषति नित्यकालं ।
अतृप्त सत्वा वचनेन तस्य
यं सो प्रमुंचेद्वरमेकवाचं ॥

2. C °priti | . — 4. BC °ti çuddho jñâyeti° C °satvâṁ susakhilo çla°.

6. C °tasya kârî(?) jane° B °ko vî jane° BC °nîyaṁ bha ° nasya pri°. — 8. BC °naṁ | ta ° caryâṁ sa° B °nârthâṁ ca ba° C °rthavanto ba° BC °sya a°. — 10. C akushṭe na ja° B akushṭava° BC °shaṁ | yo aṅgu(C aṁja)lihi na ° stûpe ra so apâ°.

12. BC ra so apâ° B °yaḥ | va° BC °kula martyaloke âḍhya°. — 14. BC °ço || yo aṁjaliyo va ° paṁ de°.

16. B °loke | ma° C °loke ma° B °râjâ na°. — 18. B na khâri hâ° BC °hâniṁ ca kadâcit tasya° B °sya | añjaliyo va° C °liyo vadanti bu°. — 20. BC ayoktapatraṁ na kadâcid bhâshe su°.

22. B °vâcâṁ | .

कालं करोन्तो जिनमदृशासि
मनोज्ञघोषां वसे राजधानीं ।
सो इन्द्रकीले स्थित लोकनाथं
पुष्पां गहेत्वा अभिकिरे वेगजातो ॥
स्वकस्मिं गृहे जिनमद्दशासि
भुंजित्व भक्तं वदन्त धर्मं ।
प्रसादजातो जिन सत्करोति
गृहीत्व पात्रं व्रजे नायकस्य ॥
प्रतिगृह्णते तस्य जिनोऽन्तिकातो
ज्ञात्वान चित्तं चरितं उदारं ।
तस्य यशो भेष्यति देवलोके
विशिष्ट लोके असदृशो दक्षिणीयो ॥
गृहीत ज्ञात्वा सुगतेन पात्रं
सो वेगजातो परितुष्टचित्तो ।
उल्लोकयित्वा तद देवलोकं
जनेय च्छन्दं इममेवरूपं ॥
मोचेय सत्वां बज्रदुःखप्राप्तां
अन्धान चक्षु सिय सर्वलोके ।
आलोकप्राप्तो तमस्मिमिरस्य घाती
अतीर्णसत्वानहमपि तारयेयं ॥
अमुक्त मोचेयमसंस्कृतातो
सृष्टित्व शान्तां वरमग्रबोधिं ।
चरे अहं दशदिशा असंप्रकंपो
बुद्धित्व ज्ञानं दुःखितां प्रमोचे ॥

1. B °rontâ jinam adriçâmi ma° C °ronti jinam addṛiçâmi ma ° dhâni | . — 3. BC °kilo sthi° C °shpâm̃ gṛihitvâ° BC °bhikile ve°. — 5. C svapam̃cakasmim̃ gṛi ° ddaçâsim̃ bhum̃° B °ddaçâm̃si bhum̃° C °ktam̃ ca va° BC °danti dha°.

7. BC prâsâda° B °vrajennâya°. — 9. BC °gṛihnate° C °jino nti° BC °cittaca°.

11. B °viçishṭhalo°. — 13. C °tram̃ sâ ve° B °jâtâ pari°. — 15. B °tvâ tta devalo° C °tada lovalokam̃ janeya cchandam̃si yam eva° B °chandasi yam̃ eva°.

17. C °satvo ba° BC °prâptam̃ andhâ°. — 19. C °pto tamatimirasya ghâṭi uttirṇṇa ° pi târam̃peyam̃ | .

21. C °ceya nasam̃ ° to pṛiçi° BC °çânto vara°. — 23. C valam̃ hi daçamahim̃ hi asapra° B cale ahaṁ daçahi asam̃° BC °buddhatva jñâ° C °ḳhitâ pramoca | .

ज्ञात्वान तस्य प्रणिधिमेवरूपां
यथा तं चित्तं ततो बुद्धज्ञाने ।
स्मितं करित्वा जिनो व्याकरोति
बुद्धो तुवं भेष्यसि लोकनाथो ॥

इदमवोचद्भगवानात्तमना विशुद्धमति भिक्षुः सदेवमानुषासुरलोको भगवतो भाषितमभ्यनन्दे ॥

अवलोकितं नाम सूत्रं महावस्तुस्य परिवारं समाप्तं ॥

बोधिसत्वो यथा वीरो नैरंजनामुपागमे ।
अथ कालो महा[225b]नागो एको व अनुचिन्तयत् ॥
यथायं रणते पृथिवी कंसपाचीव ताडिता ।
निःसंशयं महावीरो लोके प्रादुर्भविष्यति ॥
रणतीं पृथिवीं श्रुत्वा नन्दिघोषसमाकुलां ।
भवनातो उत्तरित्वान समन्तं स विलोकये ॥
विलोकयन्तो महानागो असदृशं पुरुषोत्तमं ।
अग्निस्कन्धं ज्वलमानं विद्युं वापि घनान्तरे ॥
नैरंजनायां तीरे अद्भुतगामि अनिघो पुरुषसिंहो ।
घृतऊतनिभाननस्तं नागो काल भवन्तं वन्दे ॥
ततो उदग्रो समानो प्रीतिसुखसमर्पितो ।
बोधिसत्वं नमस्यन्तो इमां गाथामभाषत ॥
यादृशा मे पुरा दृष्टा लोकनाथा महायशाः ।
तेषां तुवं पि सदृशो अच मे नास्ति संशयः ॥

1. B °ṇidhi evarû° C °yathaiva ci° BC °ddhajñâne smi°. — 3. C °buddham̃ stuvam̃° B °buddhe tu°. — 5. B °viçumati bhi° C °mânusho ca loko°.

7. C iti çrimahâvastuavadâne avalo°. — 8. C °yadâ viro nai°. — 9. BC atha kolo ma° kakoçam anu° B °ntayana | C °ntayam̃ | . — 10. C yathâ ranate pṛi° B °vi ḳam̃çapâ° C °pâtreva tâ°.

11. BC nihçam̃sayam̃°. — 12. C ranatim̃ pṛi° BC °thivi çru°. — 13. C °samantena vi° B °ntam̃ na vi°. — 14. C °lokayam̃ ma° B °asadṛiçâ pu° C °dṛiço pu°. — 15. B °dyum̃ vâtra gha° C °vâta gha°.

16. C °gâmi anighosha pu° B °gho | puru°. — 17. BC °nâgakâlasamaye bhavantu vande ‖ . — 18. BC °dagrâ sumano pri°. — 19. C °bhâshi ‖ B °shati | . — 20. BC °dṛishṭvâ lo° C °yaçâ | .

यथा उत्तरसे पादं दक्षिणं पुरुषोत्तम ।
दिशामभिविलोकेन्तो अद्य बुद्धो भविष्यसि ॥
यथेयं रणते पृथ्वी कंसपाचीव ताडिता ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा च भवनं मह्यं अन्धकारतमिस्रकं ।
ओभासेन स्फुटं सर्वं अद्य बुद्धो भविष्यसि ॥
यथा विमानो तेजेन स्फुटो तिष्ठति सर्वशो ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा च विमला नेत्रा विशुद्धा मम नायक ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा चीवरनिक्षेपा यथा च अवगाहसि ।
नैरंजनां शीतकालां अद्य बुद्धो भविष्यसि ॥
यथा नैरञ्जना रम्या कुसुमेहि समाकुला ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा च पुष्पा वर्षन्ति देवा क्षिपन्ति अम्बरा ।
वृत्ता च प्रणता सर्वे अद्य बुद्धो भविष्यसि ॥

शुचिजलं च वहते प्रतिपूर्णं
पार्थिवोत्तमसुतो अवगाह्य ।
अभ्युद्यन्तो अभिषेचयित्वा
उपागमे पुरिमबुद्धनिषद्यां ॥
सर्वमहीं सचतुर्द्वीपसशैलां
खेडपिण्डं व अनपेक्षो जहित्वा ।

1. C yathâ me uddha° BC °ttamaṁ | . — 2. C °lokyanto a° B °vishyati | . — 3. C yathâyaṁ ra ° pâtreva tâḍitâḥ | . — 4. B °viro a° C °viro a ° shyati ‖ . — 5. B °bhagavân ma° C °bhagavan ma° BC °kâratimisakaṁ | .

6. B °shyati ‖ . — 7. C °vimâna ° sphuṭaṁ ti° B °rvaço niḥ°. — 8. B nihçaṁsayaṁ° C nihçaṁsayaṁ saṁçayaṁ ma° BC °viro adya°. — 9. C °çuddha ma° BC °yakaḥ | . — 10. BC nihçaṁsayaṁ ° viro a° B °vishyati | .

12. C °raṁjanâ çi°. — 13. C °kulâḥ | . — 14. BC nihçaṁsayaṁ mahâvîro a°. — 15. B °pushpa va° C °pushpa varsheti devâḥ kshapanti° B °vâ kshepanti° BC °mbarâḥ | .

16. C vṛikshâgra praṇa° B °shyati ‖ C °shyati çu°. — 17. B °pratipûrṇṇu(?) pâ° BC °vagrâhya° B °hya gâtra abhyu° C °hya gâtrâbhyu°. — 19. BC °shecetvâ upâdhame | pu ° dyâṁ sa°.

21. C sarvaṁ mahiṁ sa ca° BC °caturdvi ° lâṁ | kheḍapiṇḍam iva a ° tvâ yâce°.

याचे स्वस्तिकं तृणां नरसिंहो
यत्र निषण्णो स स्पृशे वरबोधिं ॥
तस्य तृणां मृदुकतूलनिकाशां
स्वस्तिको कनकबिम्बनिभस्य ।
वेगजातु अदद्दे तृणमुष्टिं
तं गृह्य च मृदुतूलांगुलपाणिः ॥

अथ खलु बोधिसत्वो सिंहविक्रान्तं विक्रमे अनुत्तरस्य अमृतस्य आहरणताय[226°]ये । नागविक्रान्तं विक्रमे । ऋषभविक्रान्तं विक्रमे । हंसविक्रान्तं विक्रमे । क्रोञ्चविक्रान्तं विक्रमे । दुष्प्रधर्षविक्रान्तं विक्रमे । अग्रोत्पादविक्रान्तं विक्रमे । श्रेष्ठोत्पादविक्रान्तं विक्रमे । पूर्वोत्पादविक्रान्तं विक्रमे । युगोत्पादविक्रान्तं विक्रमे । प्रणिधिपूर्वोत्पादविक्रान्तं विक्रमे । शत्रुमथनविक्रान्तं विक्रमे । अपराजितविक्रान्तं विक्रमे । महापुरुषविक्रान्तं विक्रमे । अलीनविक्रान्तं विक्रमे । अदीनविक्रान्तं विक्रमे । अहीनविक्रान्तं विक्रमे । अभीतविक्रान्तं विक्रमे । हितैषीअनन्धकारीकरणताये महाविक्रान्तं विक्रमे । महासंग्रामविजयाये अनुत्तरस्य अमृतस्य आहरणताये विक्रान्तं विक्रमे ॥

अथ खलु बोधिसत्वं सिंहविक्रान्तं विक्रमन्तं । नागविक्रान्तं विक्रमन्तं । ऋषभविक्रान्तं विक्रमन्तं । हंसविक्रान्तं विक्रमन्तं । क्रोञ्चविक्रान्तं विक्रमन्तं । दुष्प्रधर्षविक्रान्तं विक्रमन्तं । अग्रोत्पादविक्रान्तं विक्रमन्तं । श्रेष्ठोत्पादविक्रान्तं विक्रमन्तं । पूर्वोत्पादविक्रान्तं विक्रमन्तं । युगोत्पादविक्रान्तं विक्रमन्तं । प्रणिधिपूर्वोत्पादविक्रान्तं विक्रमन्तं । शत्रुमथनविक्रान्तं विक्रमन्तं । अपराजितविक्रान्तं विक्रमन्तं । महा-

1. BC °sharaṇṇo spriçe vara°. — 3. B °nâṁ mridukûla° C °dutûlani ° bhasyâ ve° B °sya ve°. — 5. BC °tu adaye tri BC °grihya mri° C °lâṁgulim pâṇiḥ ‖ .

7. BC °mritasya âraṇatâye | . — 9². BC dushyadha° C °dharmavikrâ°. — 9³. C agrotpâdavikrame | . — 10¹. BC çreshṭotpâ°.

11². BC çatrurmatha°. — 12³. *Le passage compris entre* 12³ *et la fin du paragraphe est répété dans* B *et* C, *la répétition est désignée par* b c. — 13¹. c ° kramena | . — 13³. Bb Cc atitavi°. — 14¹. Cc °shiandhanakâri° b °anaṁdhakâri° C °natâyair mahâ°. — 14². C mahâgrâ° c ° yâye amritasya anuttarasya âha° C °mritasya âraṇatâye mahânâgavikrâ° bc °tâye mahâvikrâ ° krameti ‖ a° BC °krame | ali°.

16¹. C °satvo siṁ°. — 17¹. C haṁsavikrâtaṁ | taṁ vikrama°. — 17². C kroṁcavikrâ°. — 17³. BC dushyadha° C °dharmavikrâ°. — 18¹. C agotpâda ° kramaṁ çre°. — 18². C çreshṭotpâ°. — 19¹. C °mantaṁ | pûgo(?)tpâdavikrântaṁ vikramantaṁ | praṇi°. — 20¹. BC çatrurmatha° C °kramaṁ | . — 20². C °kramaṁ | . — 20³. C °kramaṁ.

पुरुषविक्रान्तं विक्रमन्तं । अलीनविक्रान्तं विक्रमन्तं । अदीनविक्रान्तं विक्रमन्तं । अभीतविक्रान्तं विक्रमन्तं । हितैषीअनन्धकारीकरणतायै महाविक्रान्तं विक्रमन्तं । महासंग्रामविजयायै अनुत्तरस्य अमृतस्य आहरणतायै महाविक्रान्तं विक्रमन्तं पंच वाणशतानि बोधिसत्वं अनुप्रदक्षिणीकरोन्ता अनुपरिवर्तेन्सुः । पंच हंसशतानि बोधिसत्वं अनुप्रदक्षिणीकरोन्ता अनुपरिवर्तेन्सुः । पञ्च क्रोञ्चशतानि बोधिसत्वमनुप्रदक्षिणीकरोन्ता अनुपरिवर्तेन्सुः । पंच मयूर[226b]शतानि बोधिसत्वमनुप्रदक्षिणीकरोन्ता अनुपरिवर्तेन्सुः । पंच जीवंजीवकशतानि बोधिसत्वमनुप्रदक्षिणीकरोन्ता अनुपरिवर्तेन्सुः । पंच कन्याशतानि बोधिसत्वमनुप्रदक्षिणीकरोन्ता अनुपरिवर्तेन्सुः ॥

कालो नाम नागराजा अद्दर्शि दृष्ट्वा च पुनर्बोधिसत्वमेतदुवाच ॥ एहि महाश्रमण एहि महाश्रमण येन त्वं महाश्रमण मार्गेण आगच्छसि स भगवां पि महाश्रमण क्रकुच्छन्दो एतेन मार्गेण आगतो सो च अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो त्वं पि अद्य महाश्रमण एतेन मार्गेण आगच्छसि अद्य तुवं पि अनुत्तरां सम्यक्संबोधिमभिसंबुद्धिष्यसि । येन महाश्रमण मार्गेणागच्छसि भगवानपि कोनाकमुनि एतेन मार्गेण आगतो सो च अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो त्वं पि महाश्रमण एतेन मार्गेण आगच्छसि अद्य त्वं पि अनुत्तरां सम्यक्संबोधिमभिसंबुद्धिष्यसि । येन त्वं महाश्रमण मार्गेणागच्छसि भगवां महाश्रमण काश्यपो एतेन मार्गेणागतो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो त्वं पि महाश्रमण एतेन मार्गेणागच्छसि अद्य त्वं पि सम्यक्संबोधिमभिसंबुधिष्यसि ॥

अथ खलु कालो नागराजा बोधिमण्डं गच्छन्तं गाथाभिरभिस्तवे ॥

1[1]. C °kramaṁ | . — 1[2]. C adina ° kramaṁ | B °kramantaṁ | adinavikrânta vikramantaṁ | ati°. — 2[1]. B atilavikrâ° C °kramaṁ hi°. — 2[2]. B °shînaandha° C °shiandhanakâ° BC °nâvikrânta vikramaṁ | . — 3. BC tâye mahâsaṁ° C °kramaṁ | pañcâ vâṇa° B °mantaṁ | pañca vâṇiça° C °satvo anu° B °ntâ aluparivarttetsuḥ | C °ntâ | anuvarttayetsuḥ | . —4. B °kshiṇikarokarontâ° C °nuprari° BC °rttetsuḥ ‖ . — 5. B °anuvarttetsuḥ ‖ . 6. BC °rttetsuḥ ‖ . — 7. C °vaṁjivaçatâ °ntâ pari° BC °rttetsuḥ ‖ . — 8. BC pañca kaṁnyâ ° rttetsuḥ ‖ . — 10[1]. C °jâ adarçi dṛi ° na bodhi°. — 10[2]. C chi mahâçravaṇa yena tvaṁ mahâçravaṇa mârge° BC °rgeṇa âgacchati ‖ sa bha° C °bhagavân api mahâçravaṇo krakucchando e ? to sau ca anu ° ddho tasmin mahâçravaṇo ete° B °ddho tasmin asmân mahâçramaṇa ete° BC °cchasi | adya° C °râṁ saṁmya°.

14. B tena mahâçramaṇe mârgenâgacchasi | bha° C yena mahâçravaṇena mârgeṇa âgacchasi | bha ° to sau ca anu ° dhim adhisaṁbuddho tvaṁ pi mahâçravaṇa e° BC °cchasi | adya° B °ttarâ samya° C °ttarâ saṁmya° B °shyati ‖ .

17. C °çramaṇa mârgeṇâgacchasi | bhagavân mahâçravaṇa kâçya° B °po eteṇâ mârgeṇâ° B °ddho ‖ tvaṁ° C °çravaṇa e° B °cchasi | adya° C °pi saṁmya°.

अथ कल्पसहस्राणि वशिभूतसहस्रकोटीननुचीर्णं ।
दृष्ट्वा तदा व्रजन्तं कालो शाक्योत्तममवोचत् ॥
मार्गेण येन गच्छसि द्विपदोत्तम अद्भुतं असंभीतं ।
अद्य जिनपारमिताये सर्वसत्वान चरितं बुध्यसि ॥
येन ते पुरिमा बुद्धा मृदुमार्गेण प्रस्थिता ।
तेन त्वं प्रणतो वीर अद्य बुद्धो भविष्यसि ॥
क्रकुच्छन्दो भगवां बुद्धो मुनि कोनाकसाह्वयो ।
काश्यपो भगवां बुद्धो भवां येतेन प्रस्थितः ॥
येन गतो क्रकुच्छन्दो कोनाकमुनि च काश्यपो ।
एतेन त्वं गच्छ वीर अद्य बुद्धो भविष्यसि ॥
यथा तृणानि गृह्णासि यथा याचसि स्वस्तिकं ।
यथोपेसि महीमण्डं अद्य बुद्धो भविष्यसि ॥
यथा इमे शुद्धावासा वशीभूता करपुटाः ।
नमस्यन्ति तर्हि एषां सत्का[227a]रो शाक्यसुता समः ॥
पुरिमेहि यथा विमानं तेजेन स्फुटं सर्वशः ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा च भवनं मह्यं अन्धकारतमिस्रकं ।
ओभासेन स्फुटं सर्वं अद्य बुद्धो भविष्यसि ॥
यथा च विमला नेत्राः विशुद्धा मम नायक ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा च रणते पृथ्वी कंसपात्रीव ताडिता ।

1. BC °vaçibhû° C °koṭini anupûrṇṇaṁ dṛi° B °koṭim anucirṇṇaṁ dṛi°. — 2. BC °vocat mâ°. — 3. BC °yena eva siddhipadottama(C °mah) | adru ° bhîtaṁ adya°. — 4. BC adya janikshayâya sarvasatvacaritâni bu°. — 5. C yema te° B °buddhyâ mṛi ° sthitâ te°.

7. C °hvayaḥ | . — 8. C °gavân buddho bhavân petena prasthito | . — 9. C yenâgato kra ° muni kâçya°. — 10. BC çiri ca tena tvaṁ° C °viro adya°.

11. BC °gṛihnâti yathâ vâca(C °vâvâ)si sva°. — 13. C yathime° BC °puṭaiḥ | . — 14. BC °syanti(C °nti sa) tu hyeshâṁ° BC °satkaro° B °suta samaḥ | C °suta samo | . — 15. C yathâ vimâna purimakehi teje° B purimakehi yathâ ° sphuṭaki sarva° C °ṭaṁ ca tishṭhati sarvâṇo ni°.

16. C nismayaṁ viro adya° B nihçaṁsayaṁ mahâviraḥ adya° C °shyati | . — 17. B °bhavane ma° BC °kâratimâsakaṁ | . — 18. B obhâse ca sphu°. — 19. C °netri viçu° BC °yakaḥ | . — 20. BC nihçaṁsayaṁ° C °viro adya°.

21. C °ditâḥ ni°.

IMPRIMERIE NATIONALE.

निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा च वाता वायन्ति यथा वृक्षा निरिंगिता ।
यथा द्विजा निकूजन्ति अद्य बुद्धो भविष्यसि ॥
यथा मेदिनी पुष्पेहि समंगिभूतमण्डिता ।
बुद्धानामेव उत्पादे एवं भोति अलंकृता ॥
यथा वाणशता पंच करोन्ति त्वां प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा पक्षिशता पंच करोन्ति त्वां प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा हंसशता पंच करोन्ति त्वा प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा क्रौञ्चशता पंच करोन्ति त्वा प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा मोरशता पंच करोन्ति त्वा प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा जीवकशता पंच करोन्ति त्वा प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा पूर्णकुम्भशता पंच करोन्ति त्वां प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
यथा कन्याशता पंच करोन्ति त्वां प्रदक्षिणं ।
निःसंशयं महावीर अद्य बुद्धो भविष्यसि ॥
संमुखं पि च जिनपारमिताये

1. BC nihçaṁsayaṁ° C °viraḥ adya°. — 2. B yathâ vâto vâyanti° C °ca vâto vâyaṁnti° B °nilimgitâ | C °nilimgitâ | . — 3. C °dvijâ hi kûja° B °jâni kujanti°. — 4. BC °sarvâyaṁ bhûta°. — 5. C °nâm evam udâ evaṁ° B °evam utpâdâ evaṁ bho° C °kṛitâḥ | .
6. C °ronti tvâ pra°. — 7. BC nihçaṁsayaṁ mahâviro a°. — 8. C yathâ paṁtraçatâ° B °patraçatâ° C °nti tvâ pra° BC °ṇaṁ ni°. — 9. BC nihçaṁsayaṁ mahâviro(C °raḥ) adya° B °buddhaḥ bha°. — 10. C *passe les lignes* 10-13.
11. B nihçaṁsayaṁ°. — 13. B nihçaṁsayaṁ ° buddha bha°. — 14. C yathâ mauraça°. — 15. B nihçaṁsayaṁ° B °viraḥ a° C °viro a°.
16. C yathâ jivaṁjivaçatâ°. — 17. BC nihçaṁsayaṁ° C °viro adya°. — 18. C yathâ pûrṇṇaçatâ paṁ° C °nti tvâ pra°. — 19. BC nihçaṁsayaṁ°. — 20. B °thâ kaṁcyaçatâ° C °thâ kaṁnyâ ° nti tvâ pra°.
21. BC nihçaṁsayaṁ mahâviraḥ adya°. — 22. BC âmukhehi ca ji ° upagame° C °buddhe ni° BC °shadya sva°.

उपागमे पुरिमबुद्धनिषद्यां ।
स्वस्तिककाले स लोकप्रदीपः
उपाविशे महिरुहाग्रसमीपे ॥

अथ खलु कालो नागराजो बोधिसत्वं सिंहासनगतमभिस्तवे ॥

यथा मृदूहि जालेहि संस्तरित्वान संस्तरं ।
यथा पर्यंकमाभुंजसि अद्य बुद्धो भविष्यसि ॥
यथा वाणशता पंच करोन्ति त्वां प्रदक्षिणं ।
समीपे द्रुमराजस्य अद्य बुद्धो भविष्यसि ॥
त्वं पि नरवीर चरियां अद्य निषेवसि पूर्व अनुचीर्णां ।
धक्ष्यसि त्वं शठसैन्यं सहय सनागरथ सपदातं ॥
यथा द्वाचिंशती काये महापुरुषलक्षणा ।
निःसंशयं मारसैन्यं प्रभंजित्वा विरोचसि ॥
अद्य त्वं [227b] साश्रवं चित्तं किलेसमदसूदन ।
ज्ञानेनोत्पाटयित्वान बोधिं प्राप्य विमोक्ष्यसि ॥
अद्य ते सह धर्मेण प्रतिवक्ता न भेष्यति ।
इति कालो महानागः उरगाणां वरोत्तमः ।
हृष्टो प्रांजलिको आह अद्य बुद्धो भविष्यसि ॥

बोधिसत्वो कालं नागराजानं संरागेति ॥ एवमेतं महाकाल एवमेतं महानाग अद्याहं अनुत्तरां सम्यक्संबोधिमभिसंबुध्यिष्यं ॥

तं च कालमवचि द्विपदेन्द्रो
प्रीतिहर्षपरिवृंहितकायो ।

2. B svasti | kâlepa lo° C svastikâleya lo ° dipo u° BC °upaviçe mahîru° C °mîpe ‖ . — 4. B °stave ya°. — 5. C °mṛiduhi jâ° BC °tvâ namaskaritvâna(C °na maṁ)staraṁ ya°.
6. C °m âbhujasi a° B °jasi ‖ adya°. — 7. C °nti tvâ pra°. — 8. C çatadru° B samadru° BC °drumasya râ°. — 9. BC °naravîracaritâṁ nishe° BC °pûrvvam anu° C °nuvistîrṇṇaṁ | B °rṇṇâṁ dhakshasi°. — 10. B dhakshasi çaṭha° C drakshyasi çaṭha° BC °nyaṁ haya(C °hapa)râjarathaṁ sapa° B °taṁ ya°.
11. B °ti ye kâye° C °tî hi kâye ma ° ṇâye niḥ° B °ṇâ niḥ°. — 12. B nihçaṁsayaṁ°. — 13. C °çravâ ci° BC °ttaṁ kleça° C °çamasudanaṁ | B °madaçûdanaṁ jñâ°. — 14. BC °nenotpâdayi ° tsyati ‖ . — 15. BC °tivaktrâ na bhe°.
16. C °gaḥ turagâ varo°. — 17. B hṛishṭâṁ prâṁ°. — 18[1]. B °satvaṁ kâlo nâgânaṁ saṁ° C °kâlo nâ° BC °saṁrâdhati°. — 18[2]. C °buddhishyaṁ | . — 20. BC taṁ ca kâlo avaci dvipadendraṁ prî° C °rivṛihatikâyo ‖ B °vṛiṁhatikâyo ‖ .

अद्य काल वचनं तव सत्यं
अद्य स्पृशिष्य अनुत्तरबोधिं ॥
अपि महिधरा गिरिवरा न भवेया
चन्द्रमाच गगणा प्रपतेया ।
नैवाहन्तच गतो न भवेयं
भोहि प्रीतिमनसो भुजगेन्द्र ॥
मेरुशृंग अनिलो विधमेया
मेदिनी च गगणं च समेया ।
मादृशा न हि सिंहासनश्रेष्ठं
उपगम्य अमृतं न स्पृशेन्सुः ॥
सो गिरां प्रमुंच तच निषण्णो
तिर्यं व द्रुमवरस्य समीपे ।
अद्य सर्वभवमूलमशेषं
ऊहनामि रजनीक्षयकाले ॥
स्तवित्व कालो संबुद्धं द्वाचिंशवरलक्षणं ।
प्रदक्षिणं करित्वान तत्रैवान्तरहायिथ ॥

निषण्णो बोधिसत्वो पंच संज्ञा प्रतिलभे ॥ तद्यथा अतीतसंज्ञा क्षेमसंज्ञा सुखसंज्ञा अशुक्यसंज्ञा ॥ इमां च पुनः परसंज्ञां प्रतिलभते ॥ अद्यमहमनुत्तरां सम्यक्संबोधिमभिसंबुद्धेयं [चत्वारि नीतयो तद्यथा साम दण्डो भेदो प्रदानो] ॥ अथ खलु मारो पापीमां येन बोधियष्टिस्तेनोपसंक्रमित्वा वैहायसे अन्तरीक्षे स्थितः प्रांजलीकृतः बोधिसत्वं नमस्यन्तो ॥ अथ खलु बोधिसत्वो मारं पापीमं इमाये गाथाये अभ्यभाषे ॥

1. C adya adya kâ°. — 3. BC °mahîdharâ giridharâ na bha ° ndramâtrâ gaganâ pra-(C °ṇân pra)pateyâ neva°. — 5. BC nevahan ta(B °haṁ ta)m agataṁ na bha° C °bhoti prîtimâna° BC °bhujaṁgendra meru°.

7. C °dhamemâ medi° BC °dini ca ga°. — 9. BC yâdṛiçâ hi siṁhâsana(C °naṁ)çreshṭaṁ u ° çetsuḥ ‖ .

11. C °pramukhaṁ ci tatra° BC °sharṇṇo tîryyaṁ vâ dru°. — 13. B °shaṁ uha° BC °rajaniksha ° le sta°. — 15. C stavilva kâ ° triṁçadvara° BC °ṇaṁ pra°.

16. BC °ntara nisha°. — 17¹. C nisharṇṇo | ho° B nisharṇṇo bodhisatva paṁ°. — 17². C °sukhaṁsaṁjñâ a°. — 18¹. BC °saṁjñâ pra°. — 18². B °budhyo(?)shyo catvâ° C °ddheshya catvâ° B °thâ ‖ sâ° BC °dandomabhedopapradâno(C °nâ)‖. — 20. C °sthito prâñjaliṁkṛito bo° B °taḥ prâñjali°.

21. BC imâṁ gâ° C °ye asvabhâve ‖ .

वैहायसे तिष्ठसि अन्तरीक्षे
वेगप्रमत्तो मृगमण्डलीव ।
नमस्यन्तो प्रांजलि वन्द्मानो
तं वन्द्नीयं इह त्वं नमस्यसि ॥
अहं वो ईश्वरो राजा विचेता सर्वप्राणिनां ।
सुखदुःखस्य विद्वांसो लोके पर्यायकोविदु ॥
याव ते यौवनं वीर आरोग्यं च महायश ।
भुंज मानुष्यका कामां पितुर्निवेशने वस ॥
महीं रम्यां आवसेहि स्फीतां उद्धिमण्डलां ।
महायज्ञानि यजमानो राज्यं कारेहि गौतम ॥
अश्वमेधं पुरुषमेधं पुण्डरीकं निरर्गडं ।
एतां यज्ञां यजित्वान होहिसि अमरो मरु ॥
एतां [228ᵃ] यज्ञा यजित्वान त्रायस्त्रिंशा सद्रन्द्रिका ।
मोद्न्ति कामकामानां..... ॥
एवं त्वं हि मार्ष क्रुहि करोहि वचनं मम ।
मा आगामिके विहन्याहि हित्वा सांदृष्टिकं फलं ॥
इमां गाथां भणे मारो बोधिसत्वस्य सन्तिके ।
तथावादिनं च मारं बोधिसत्वो ध्यभाषति ॥
प्रमत्तबुद्धि पापीमं कस्य अर्थं इहागतः ।
नैव त्वं ईश्वरो राजा न ब्रह्मा न प्रजापतिः ॥

1. BC °yasaṁ tishṭha ° liva(C °vaṁ) nama°. — 3. B namasyato prâñ° C °jaliṁ vandamâ ° syati | . — 5. B °vo içva°.

6. BC sukhasya ca duḥkhasya ishâṁço(C °imâṁ so) lo° C °lokaparyyayako° BC °du yâ°. — 7. B yâca te yau° C °vîram âro° BC °yaçaṁ bhuṁ°. — 8. BC °ja manu° C °shyakâmâṁ° BC °pitur eva nive(C °vesc)ne âvasehi(B °hi |) ma°. — 9. BC °mahi ramyâṁ sphi° ṇḍalâ ma°. — 10. C °ni jajamâ° B °yajyamâ ° jyaṁ kâlehi gautamaḥ | C °gauttamaḥ | .

11. C açvamedhaṁ puṇḍarikaṁ samya*ktrâ*(??)nira° B °rikaṁ samya*kryâ*(?)sa nira°. — 12. C etaṁ yajñâ yaji° BC °hohati amarâ maru | (C °ruṁ) e°. — 13. BC °tvânas traya ° ndrikâ mo°. — 14. BC °nâṁ | . — 15. B gataṁ tvaṁ haṁ mâ° C gatâhaṁ tvaṁ mâ ° naṁ ma mâ â°.

16. BC °vihaṁnyâ°. — 17. B °dhisatvasanti°. — 18. C tathâtathâvâ° BC °ditaṁ mâ° C °mâro bo ° tvo 'dhya°. — 19. BC °ttabaddha pâpimaṁ(C °me) svena arthaṁn i(C °rtha i)hâ° C °gatâḥ nai°. — 20. C naivaṁ tvaṁ i ° pati | .

सच त्वमीश्वरो अस्मा न मे याचेसि प्रांजलि ।
सुसमृद्धापि या जातिः हीनोत्कृष्टा च मध्यमा ।
तां नाहं अभिनन्द्यामि अनपेक्षो स्मि ते पि हि ॥
सुसमृद्धा पि ये कामा हीनउत्कृष्टमध्यमा ।
ते प्यहं नाभिनन्द्यामि अनपेक्षो स्मि ते पि हि ॥
ये पिमे पंच कामगुणा लोकस्य सुखसम्मता ।
ते प्यहं नाभिनन्द्यामि अनपेक्षो स्मि ते पि हि ॥
नागो यथा पाशं भित्त्वा दारयित्वा च बन्धना ।
गच्छति येनकामो व..... .. ॥
छित्त्वा गृहबन्धनानि गंसामि अहं पुरं वरं ।
अहो धर्ममुदीरयेन्सुः हृष्टप्रमुदिता नभे ॥

पुनर्मारो येन बोधियष्टिस्तेनोपसंक्रमित्वा उपरिवैहायसं अन्तरीक्षे अस्थासि ॥ बोधिसत्वो तं आह ॥ कस्त्वं ॥ मारो आह ॥

अहमीश्वरो मदकरो मरुमानुषाणां
मह्यं सुरासुरवरो विषयानुवासी ।
संसारपंजरगता मदनाभिभूता
कामातुरा मुच्यन्ति मृत्युपाशा ॥
तं वाचया मधुरया परमार्थदर्शी
मारं ब्रवीत महिमण्डगतो महर्षि ।
आकल्पकोटि कुशलोघसमन्वितस्य

1. BC °jalim̃ | . — 2. C °ddhâpi yâm̃ jâ ° no utkṛishṭamadhyamâḥ | B °tkṛishṭaç ca ma°. — 3. BC na câham abhi° B °mi napekshesmiṁ pi te pi hi ‖ C °pekshasmiṁ te pi hi ‖ nâgo°. C *donne ces vers dans l'ordre suivant : 3, 8, 6, 7, 10; 4 et 5 sont omis.* — 4. B °tkṛishṭhama°. — 5. B °pekshesmiṁ te pi hi | .

6. C ye ca ma °khasam̃matâḥ | . — 7. C tenâpya° BC °nâtinandâ° B °anupekshasmiṁ te pi hi | C °anupesmiṁ hi te pi hi | gaccha°. — 8. B °thâ pûtitvatâ dârayitvâ abandhatâ | gaccha° C °yathâ pûtitatvâ dârayitvâ ca bandhanâḥ | ye ca me°. — 9. BC gacchati yena kâmo eveva cchi(C °kâmenam̃ evam̃ cchi)tvâ gṛi°. — 10. BC cchitvâ gṛi° BC °nâni | gam̃° B °punavaram̃ aho° C °punar varam̃ aho°.

11. C °dharma u ° ditâna labhe ‖ . — 13[1]. BC °ha ka°. — 14. B °çvaro makaro maru° BC °ṇâm̃ mahyam̃ surâ ° shayam̃ nuvâsi sam̃°.

16. B °sârayam̃jaragata manobhi° C °gatâ manobhibhûtâḥ | kâmâm̃tulâ mucyantu mṛi° B °bhûtâ | kâmânturâ mucyata mṛi° BC °pâçâm̃ tam̃ vâ°. — 18. BC °rçi ‖ mâ ° vitum̃ mahi(C °hi)manda ° rshi yam̃ kalpa°. — 20. BC yam̃ kalpa ° tasya | vaca ° vasya ci°.

वचनं नरर्षभरुतं नरपुंगवस्य ॥
चित्तशूरो सि यदि तवेश्वरत्वं
कामेश्वरो सि यदि व्यक्तमनीश्वरो सि ।
कामातुरा हि स्त्रीणां मनुजेन्द्रगर्भं
पंके पतन्ति मणिरत्नविलम्बिचूडा ॥
तेषान्तथा निपतितान महीश्वराणां
पृष्ठे पतन्ति पुरुषाण स्त्रियो ललन्त्यः ।
ते कामरागमदवेगयुता हसन्ति
तस्मिं क्षणस्मिं प्रमदा यमदासभूता ॥
सो दासतामुपगतो प्रमदाजनस्य
ऐश्वर्यतां वदसि पश्य यथासि मूढो ।
कामातुरस्य हि न विद्यति ईश्वरत्वं
नाभू न चापि भविता इति निश्चितं मे ॥
सो हं तवाद्य सबलं युधि निर्जिनित्वा
अरुणोदये प्रतिभाते भवितास्मि बुद्धो ।
सिंहासनमनुगतो हि न कश्चि कृष्ण
उत्तिष्ठते चरमदे[228b]हगतो अबुद्धो ॥

मारो आह ॥

किं गर्जसे द्रुमवरस्मि सुखं निषण्णो
न हि ताव पश्यसिह योध्यसहस्रमालिं ।
सेनां पिशाचबलराक्षसयक्षसंघां

2. BC °çûrosmiṁ yadi asti tvam̃ i(C °i)çvaratvam̃ | kâme° C °vyaktam̃m aṇiçva° B °niç-varâsi kâ°. — 4. BC °ndragatâ pam̃° C °niratnam̃vi°.

6. BC °titâni mahi ° shâna stri°. — 8. B °kâmarâmada° C °kâmarâga(?)deve° BC °tasmiṁ kshaṇe pra°. — 10. BC so dâsyatâm upagato pramadâ yanantu dâsa(C °saçca) bhûtâ so dâsa(C °ta | sa dâsya)tâm upagatâ(C °to) pramadâ janasya ‖ ai° C °thâyathâsi mûhâ kâmâtu° B °thâsi sûdyâ kâmâtu°.

12. C °sya hîna vi ° tvam̃ ‖ nâbhûn na câ° B °tvam̃ ‖ nâbhûḥ na câpi bhanitâ i ° çcitâ me so° C °niçcayâ me so°. — 14. B °nijinitvâ° BC °pratihate bhavitâsma bu°.

16. B °sanâm anu° C °sanâm arugahi na kaçcit kṛishṇaḥ u°. — 19. C °varasmiṁ su-khaṁ nisharṇṇo na hîna tâvat paçya simhayam adya saha° B °nisharṇṇe na hitâ ca paçya simha yodyasaha°.

21. C °çâçca râ° BC °yakshasam̃ghâḥ catu° B °ginisenâm̃ mudi° C °nîm̃ ca senâm̃ mudi° BC °ditâ bahumantramantri(C °ntramantrâm̃) ‖ .

चतुरंगिनीं मुदितां बज्रमन्त्रयन्त्रां ॥

बोधिसत्व आह ॥

यदि मारकोटिनयुतानि समागमेन्सुः
कुशलौघसंचयसंचितनरर्षभस्य ।
रोमं न इंजेय कुतो तुवं कृष्णबन्धु
प्रतिगच्छ किं विलपेसि निरर्थकेन ॥

मारो बोधिसत्वेन चिन्नो स्वकं भवनं गत्वा परिवारस्य आचिक्षति ॥ एषो मारिष बोधिसत्वो बोधिमण्डे निषण्णो अनुत्तरां सम्यक्संबोधिमभिसंबोधितुकामो । सो स्थानातो च्यावयितव्यः मा मम विषयातो बज्रजनकायमतिक्रामयिष्यति ॥ तस्य दानि जनीसुतो नाम पुत्रो आह ॥ तात मा नं अन्तरायं करोहि अनुत्तराये सम्यक्संबोधये अभिसंबुध्यतु । यादृशं मे अधिगतं गर्भोक्रमणं च जातिं च अभिनिष्क्रमणं च यथा च बोधिमण्डे उपसंक्रम्य निषण्णो अद्वैष अनुत्तरां सम्यक्संबोधिं अभिसंबुद्धिष्यति । नास्ति सो सत्वो वा सत्वकायो वा बोधिसत्वस्य समर्थो अनुत्तराये सम्यक्संबोधये अन्तरायं कर्तुं ॥

निषण्णो सिंहो यथ दुष्प्रधर्षो
ओभासयित्व दिशां वृक्षमूले ।
न चैतदस्माकं कदाचि रोचति
यं एवरूपं ऋषिमाक्रमेसि ॥
शीलेन चान्तीये तपेन चैव
उपेतो सर्वपरमां गतिं गतो ।

2. C °tvam âha ‖ . — 3. B yâdi° BC °yutâni samâgametsuḥ ‖ ku° C °ghamañcayañci° BC °citasya nara°. — 5. B râmaṁ na iccheye ku° C °iccheya ku° BC °to tava kṛi° C °bandhuḥ pra ° vilapitena nirartha° B °vilapatitena nirartha°.

7¹. C mâro ca bo°. — 7². B °risho bo° BC °nisharṇṇo anu° C °bhisaṁbudhitukâmaḥ so sthâ° B °mo so sthâ°. — 9. B °to ‖ vyâvayitavyaḥ mâṁ mama vi° C °tavyaṁ | mâṁ mama vi ° yam abhinishkramishyati | B °yam abhikrâ°. — 10¹. C °janasuto nâ° B °janaṁ suto nâ°. — 10². BC °rohi | anu° C °ttarâṁ saṁmyaksaṁbodhâye a° B °dhaye anantarâya kartuṁ (l. 14)°.

11. C °çaṁ me abhigarbhopakrameṇa jâtiṁ ca a ° sharṇṇo | a°. — 13. BC °dhaye anan-tarâya kartuṁ ‖ . — 15. BC nisharṇṇa siṁha(C °hâ) ya° B °dhasho o° C °dharshyo o°.

17. B °kadâ viro° C °dâcid virocati° BC °ya evarûpâṁ rishiṁ parâkrame°. — 19. BC çile ca kshântiye ta° C °kshântiṁ ye° B °tapena vaite upetâ sa° C °caite upetâ sa° B °tiṁ gatoḥ | .

सो एवरूपो समुच्छ्रितध्वजो
गजो यथा भेत्स्यति आत्मबन्धं ॥
पश्य तुवं सर्वद्विपादउत्तमं तं
चन्द्रो यथा विभाति पूर्णमास्ये ।
कथं हि चित्तं क्रमते अबुद्धि
यो एवरूपां लभते विहेठां ॥
अंगारकर्षूं प्रपतेय न कोचि
आशीविषं पि सृशे नो करेण ।
जात्यन्धो चक्षो शुनखेहि पृष्टे
सो अन्धकूपे प्रपते अचक्षुः ॥
एवं इमे भोन्ति परीत्तचेतसो
मन्त्रो च नो अस्ति तथाविधानां ।
ये एवरूपं परिशुद्धगोचरं तं
अश्रद्दधाना प्रपतन्ति अचक्षुषो ॥
सचेवं एतं वचनं न गृह्णथ
मार्गस्थ उन्मार्गगता स्मरिष्यथ ।
पलायमाना दिशता चतुर्दिशं
यथापि. . . . भ्रष्ट क्रोष्टुको ॥

कालो अमात्यो गाथां भाषति ॥

सर्वो सुकार्थस्मि समुच्छ्रितस्मिं
सम्मोहमासन्नो विसंज्ञबुद्धिः ।

1. B °rûpâ samu° C °rûpâṁ samu° BC °bhetsati â° C °ânmabhâṁjanaṁ ‖ B °tma-bhojanaṁ ‖ . — 3. C paçyatvevaṁ sarvâdupâdânam utta° B sarvodupânam utta° BC °maṁ candro° B °thâ ço *ca*(?)bhati pû° C °çobhati pû° BC °mâsiye | . — 5. BC °buddhino yo e° C °evaṁrû°.

7. B °karshû pra° C °karshu pra° BC °teya so na koci° C °cid âsid vishaṁ° B °âçivi-çaṁshi spṛi° BC °çe so kareṇa ‖ . — 9. B °tyandha tra° C °tyandha çrasto° BC °prish-ṭhato so° B °so ndhakû ° pate cakshuko ° ‖ C °teya cakshusho | .

11. B °paritacetaso cedam atra nânâsti ta° C °ritacetaso vadâ ca maṁtrâ tathâ nâsti vi-dhâ°. — 13. C ye caivaṁ rû° B ye rûpaṁ evaṁ pa° BC °raṁ açadda° B °kshushâ ‖ . — 15. C sacaivam e° B °gṛihnatha mârgastha umârgaga° C °gṛihnatha mârgaṁstha upa-mârgagatâ smariṁshyatha ‖ . — 17. C °mâno di° BC °thâpi bhrashṭaṁ kro(B °ko)shṭukâ kâlo°. — 19. C °gâthâ bhâ°. — 20. C sarve svakârthesmiṁ sammo° B sarve svakâr-thesmi samucchritesmiṁ sammo° C °ham ânnabhamanyu buddhiḥ ‖ B °m âsannabhasanya-buddhiḥ ‖ .

यथा अयं देव असंप्रतीतो
मतिं अयुक्तां कुरुते जनीसुतः ॥

ततो मारो महासन्नाहं सन्नह्य आगतो बोधिसत्वसमीपं ॥ बोधिसत्वेन च उक्कासितशब्देन भग्नो ॥ पुनः मारो महासन्नाहं सन्नह्य बोधिमण्डे बोधिसत्वसमीपमा[229a]गतः महतीये चतुरंगिनीये सेनाये कुम्भाण्डयक्षराक्षसवतीये ॥ समन्ता त्रिंशद्योजनां स्फुरित्वा हयसहस्रयुक्तवाहनं अभिरुह्य चिचचापधरो सन्नद्धकवचितो उच्छ्रितध्वजपताकः अनेकभेरीमृदंगमरुपटहपणवशंखसंनिनादेन किलिकिलप्रक्ष्वेडितशब्दानि प्रमुंचमानाये भैरवाये विकृताये भूतगणसेनाये संपरिवृतो ॥ तद्यथा ॥ अन्ये अश्वमुखा अन्ये उष्ट्रमुखा अन्ये गर्दभमुखा अन्ये अजमुखा अन्ये मेण्डमुखा अन्ये मृगमुखा अन्ये सिंहमुखा अन्ये व्याघ्रमुखा अन्ये द्वीपिमुखा अन्ये ऋक्षमुखा अन्ये श्वानमुखा अन्ये सूकरमुखा अन्ये विडालमुखा अन्ये काकमुखा अन्ये कुक्कुटमुखा अन्ये गृध्रमुखा अन्ये कुररमुखा अन्ये अशीर्षका कबन्धा अन्ये एकशिरा अन्ये बह्वशिरा अन्ये द्विशिरा अन्ये अचक्षुषो अन्ये चैकचक्षुषो अन्ये अहस्तका अन्ये अपादका अन्ये अबाहुका अन्ये दशबाहुका अन्ये असिधरा अन्ये शक्तिधरा अन्ये तोमरधरा अन्ये भिण्डिपालधरा अन्ये शूलधरा अन्ये त्रिशूलधरा अन्ये हलधरा अन्ये चक्रधरा अन्ये मुशलधरा अन्ये मुद्गरधरा अन्ये परशुधरा अन्ये खड्गधरा अन्ये करंकधरा । अन्ये मुखतो ऽग्निं वमन्ति अन्ये सर्पा वमन्ति अन्ये क्षुरपर्यन्ता चक्रानुपरि अन्तरीक्षे भ्रामयन्ति ॥ अन्ये पादेन हस्तिनागं गृह्य बोधिसत्वं अभि-

1. B yathâyaṁ° C °to smṛitiṁ ayu°. — 3¹. B °mâro sannâha mahâ sannahi° C °nnâha sannahitvâ âga bo°. — 3². B °satvona ca u° C °sitaçitaça° BC °bhagnoḥ ‖ . — 4. C °ro sannâ° BC °nnâha sanna° C °gato mahatiṁ catu° B °hati catu° C °senâya ku ° râkshasasannipatiye B °râkshasapatiye ‖ . — 5. C °nâṁ sphari ° tâka anakaiḥ bhe° B °anekaiḥ bhe° C °ṇavasaṁkha° BC °likilâ prakshve ° muñcamâni(C °mânâni |) bhairavâyaṁ vikṛitâyaṁ bhû°.

9. C anyo açva ° nye gardattamukhâ anye jâmukhâ anye maṇṭhamukhâ anye mṛi° B °nye gadarbhamukhâ anye ajâmukhâ anye maṇṭhamukhâ anye mṛi° C °nye miṁha° BC °çvânamukhâ anye çûkaramu(C °mû)khâ anye vi° C °gṛidhramukhâ anye kularamukhâ anye açîrshakâ anye kabandhakâ anye ekaçilâ anye dviçîrâ anye bahuçirâ anye cakshushâ anye cai° B °abandha anye ekaçirâ anye bahuçilâ anye acakshusho anye dviçirâ anye cai ° nye abâhukâ anye subâhukâ ‖ anye açidharâ anye çaktiº C °daçabâhukâ ‖ anye asidharâ anye dhanudharâḥ anye çaktidha ° dharâḥ anye bhindipâradha ° dharâḥ anye tri ° dharâḥ anye hadharâḥ a ° nye mûçala ° dharâḥ anye pa° B °dgaradharâ ‖ anye pa° B °dgadharâ anye karaṁkarâ anye mukha° C °ḍgadharâ anye kalaṁdharâḥ anye mukha°.

17. B °nye ksharapa° C °nye ksharaparyyantaç cakrâṁ upari° B °bhrâmanti ‖ . — 18. BC °pâdaṁ hasti°.

द्रवन्ति । अन्ये उष्ट्रं गृह्य अन्ये अश्वं गृह्य अन्ये गर्दभं गृह्य अन्ये कबन्धं गृह्य अन्ये करंकां गृह्य अन्ये आशीविषं गृह्य अन्ये सिंहां गृह्य अन्ये व्याघ्रां गृह्य अन्ये द्वीपीं गृह्य अन्ये ऋक्षां गृह्य अन्ये गवयां गृह्य अन्ये महिषां गृह्य अन्ये शीर्षकरोटीं गृह्य अन्ये पर्वतकूटानि गृह्य अन्ये समूलानि वृक्षाणि गृह्य । अन्ये अन्तरीक्षा च अंगारवर्षं पातयन्ति अन्ये आशीविषवर्षाणि पातेन्ति अन्ये उपलवर्षाणि पातेन्ति । अन्ये हस्तिषु अभिरूढा अन्ये अश्वेषु अन्ये उष्ट्रेषु अन्ये महिषेषु अन्ये गर्दभेषु अन्ये गवयेषु अन्ये मृगेषु अन्ये सूकरेषु अभिरूढा बोधिसत्वमभिद्रवन्ति ॥ नापि बोधिसत्वस्य रोमस्यापि इञ्जित[229b]त्वं चित्तस्य वा अन्यथात्वं ॥

अथ स सगवयाश्वरथो खे बह्वहयवारणयुक्तां सेनां ।
अभिनिर्मिणीयभियासि येन बोधिसत्वासनं श्रेष्ठं ॥
सो हयसहस्रयुक्तं वाहनमभिरुह्य चिचचापधरो ।
वाचामुग्रामुदीरये हनथ हनथ गृह्णथ नं शीघ्रं ॥
कुंजरखराश्ववदना उष्ट्रमुखा मुषलपाणिनो रौद्रा ।
राक्षसगणा प्रतिभयं भ्रमन्ति यतो सौ अरिनिघाती ॥
अपराणि कबन्धानि आशीविषकानि रुहन्ति मेदिन्यां ।
इमं हनथ इमं गृह्णथ रवन्ति आर्त्तस्वरं घोरं ॥
अपरे मुखतो सर्पानग्निं विषं च वमन्ति . . . ।
पादेन गृह्य गजेन्द्रमभिद्रवन्ति पिशाचगणाः ॥

1. B anye drashṭuṁ gṛi ° nye gadarbhaṁ gṛi° C °gardavaṁ gṛi ° raṁkâ gṛi ° nye siṁhaṁ gṛi ° nye vyâghraṁ gri° BC °dvipiṁ gri° C °gavayâṁ gṛihyaṁ anye ma ° nye çirshaṁ karoti gṛi° B °rshakaroṭiṁ gri° C °parvataçriṁgâni gṛi° BC °vṛikshâni gṛihya anye anta°. — 4. C °rikshâṁ ca aṁ° BC °aṁgâravarshâ pâtaya° C °shavarshâṇi pâṭayanti | anye uparavarshâṇi pâṭayanti ‖ . — 5. C °hisheshu a garda° B °sheshu anye gadarbheshu a° C °nye çûkare°.

7. BC °syâpi iñjatatvaṁ ci° B °nyatatvaṁ *corrigé en* °thâtvaṁ ‖ . — 9. BC atha sarvo saga° B °khe | ba° BC °hujanahaya ° nâṁ abhi°. — 10. B °ṇiya abhiyâçi ye° C °ṇiya abhiyâsi | bodhi ° sanâ çreshṭaṁ so° B °tvâsanaçreshṭaṁ so°.

11. BC °dharo vâ°. — 12. C vâcam arugrâ ° diraye natha ha ° tha gṛihnatha çi° B °gṛihnatha gṛihnatha na çi° BC °ghraṁ kuṁ°. — 13. BC °kharâcavada° B °danâ drashṭumukhâ° C °ṇinâ rau° BC °drâ râ°. — 14. BC °nti | ya° B °ariṇighâtighâti apa° C °arinirghâti apa°. — 15. BC °kâni lu(C °lû)ha ° diniyaṁ ‖ .

16. B imaṁ gṛi°. — 17. BC apare ca sarppân a° B °nti te jaṁ pâ° C °nti | te jaṁ pâ°. — 18. B pâde gṛi° C pâdaṁ gṛi ° bhiṭhamanti piçâççagaṇâ parva° B °bhivanti pi ° ṇâḥ parva°.

पर्वतशृंगानपर उग्गिरमाना अभिद्रवन्ति मुनिं ।
अंगारवर्षमपरे वर्षन्ति नभे पिशाचगणाः ॥
क्षुरपर्यन्ता अपरे भ्रमेन्ति चक्राणि अन्तरीक्षगता ।
गगणे च चटचटायति असनिर्घोरां करोति शब्दां ॥

